उ० पु०	हसानि	हसाव	हसाम

लङ्

	एकवचन	द्विवचन	बहुवचन
प्र० पु०	अहसत्	अहसताम्	अहसन्
म० पु०	अहसः	अहसतम्	अहसत
उ० पु०	अहसम्	अहसाव	अहसाम

विधिलिङ्

	एकवचन	द्विवचन	बहुवचन
प्र० पु०	हसेत्	हसेताम्	हसेयुः
म० पु०	हसेः	हसेतम्	हसेत
उ० पु०	हसेयम्	हसेव	हसेम

लृट्

	एकवचन	द्विवचन	बहुवचन
प्र० पु०	हसिष्यति	हसिष्यतः	हसिष्यन्ति
म० पु०	हसिष्यसि	हसिष्यथः	हसिष्यथ
उ० पु०	हसिष्यामि	हसिष्यावः	हसिष्यामः

अव + हस्, उप + हस्—उपहासे। परि + हस्—परिहासे।

भू सत्तायाम्—होना, रहना।
('सत्सङ्गाद्भवति हि साधुता खलानाम्')

लट्

प्र० पु०	भवति	भवतः	भवन्ति
म० पु०	भवसि	भवथः	भवथ
उ० पु०	भवामि	भवावः	भवामः

लोट्

प्र० पु०	भवतु	भवताम्	भवन्तु
म० पु०	भव	भवतम्	भवत
उ० पु०	भवानि	भवाव	भवाम

लङ्

प्र० पु०	अभवत्	अभवताम्	अभवन्
म० पु०	अभवः	अभवतम्	अभवत
उ० पु०	अभवम्	अभवाव	अभवाम

विधिलिङ्

प्र० पु०	भवेत्	भवेताम्	भवेयुः
म० पु०	भवेः	भवेतम्	भवेत
उ० पु०	भवेयम्	भवेव	भवेम

ऌट्

प्र० पु०	भविष्यति	भविष्यतः	भविष्यन्ति
म० पु०	भविष्यसि	भविष्यथः	भविष्यथ
उ० पु०	भविष्यामि	भविष्यावः	भविष्यामः

अनु+भू=बोधे। अभि+भू=पराजये। उत्+भू=उत्पत्तौ। परा+भू=पराभवे। परि+भू=अनादरे। प्र+भू=उत्पत्तौ; सामर्थ्ये च (सकना)। वि+भू+णिच्—चिन्तायाम्, ज्ञाने, प्रकाशने च; विभावयति। सम्+भू—सम्भावनायाम् (मुमकिन होना) उत्पत्तौ;

मिलने च। सम्+भू+णिच्—सम्मानने, चिन्तने, विवेचने च, 'विलोचनं दक्षिणमञ्जनेन सम्भाव्य' इत्यत्र 'सम्भाव्य अलंकृत्य' इत्यर्थः।

स्था (ष्ठा) गतिनिवृत्तौ (अवस्थाने)—रहना

लट्

प्र० पु०	तिष्ठति	तिष्ठतः	तिष्ठन्ति
म० पु०	तिष्ठसि	तिष्ठथः	तिष्ठथ
उ० पु०	तिष्ठामि	तिष्ठावः	तिष्ठामः

लोट्

प्र० पु०	तिष्ठतु	तिष्ठताम्	तिष्ठन्तु
म० पु०	तिष्ठ	तिष्ठतम्	तिष्ठत
उ० पु०	तिष्ठानि	तिष्ठाव	तिष्ठाम

लङ्

प्र० पु०	अतिष्ठत्	अतिष्ठताम्	अतिष्ठन्
म० पु०	अतिष्ठः	अतिष्ठतम्	अतिष्ठत
उ० पु०	अतिष्ठम्	अतिष्ठाव	अतिष्ठाम

विधिलिङ्

प्र० पु०	तिष्ठेत्	तिष्ठेताम्	तिष्ठेयुः
म० पु०	तिष्ठेः	तिष्ठेतम्	तिष्ठेत
उ० पु०	तिष्ठेयम्	तिष्ठेव	तिष्ठेम

लृट्

प्र० पु०	स्थास्यति	स्थास्यतः	स्थास्यन्ति
म० पु०	स्थास्यसि	स्थास्यथः	स्थास्यथ
उ० पु०	स्थास्यामि	स्थास्यावः	स्थास्यामः

अधि+स्था—स्थितौ; पराभवे; प्रभुत्वे च—(सकर्मक) "आश्रमबहिर्वृक्षमूलमधितिष्ठति"। अनु+स्था–करणे। अव+स्था–अवस्थितौ;

आत्मनेपदी, अवतिष्ठते । प्रति+अव+स्था—विरोधे, आक्षेपे, शङ्कायाम्, प्रातिकूल्ये च । आ+स्था—आश्रये; "संयमे यत्नमातिष्ठेत्"। उत्+स्था+उत्थाने (उठाना)। उप+स्था–उपस्थितौ (हाजिरहोना); आत्मनेपदी; उपतिष्ठते । प्र+स्था–प्रस्थाने (चला जाना); आत्मनेपदी; प्रतिष्ठते । सम्+स्था—अवस्थाने; आत्मनेपदी; सन्तिष्ठते ।

अभ्यास

संस्कृत में अनुवाद करो—वृक्ष से पत्ता गिरता है शिशु खूब हँसता है। आपकी पत्रिका प्राप्त कर (अवाप्य) मैं सुखी हुआ । अब यदि वृष्टि हो, तो प्रचुर शस्य होगा । उनका मंगल हो । तुम लोग चिरजीवी हो । तुम दोनों भाई यहाँ रहो । वे क्या घर में थे ? जो लोग सर्वदा गुरु के पास रहते हैं, उनका कभी अमंगल नहीं होता । यहाँ और अधिक दिन नहीं रहूँगा । तू मिथ्यावादी होगा, तो नरक में गिरेगा । आँधी में (तृतीया) वृक्ष से आम गिरते हैं । ऐसी आँधी से सब फल गिर जायेंगे । उसकी बात सुनकर (श्रुत्वा) सब हँस पड़े । नहुष ऋषियों के शाप से स्वर्ग से गिरा । दूसरे का दुःख देखकर (दृष्ट्वा) कभी हँसना नहीं चाहिए । अन्धे और लँगड़े का (द्वितीया) उपहास न करना । उसे देखकर मैं आसन से उठा ।

सकर्मक परस्मैपदी धातु

गम् (गमॢ) गतौ—जाना

लट्

	एकवचन	द्विवचन	बहुवचन
प्र० पु०	गच्छति	गच्छतः	गच्छन्ति
म० पु०	गच्छसि	गच्छथः	गच्छथ
उ० पु०	गच्छामि	गच्छावः	गच्छामः

लोट्

प्र० पु०	गच्छतु	गच्छताम्	गच्छन्तु
म० पु०	गच्छ	गच्छतम्	गच्छत
उ० पु०	गच्छानि	गच्छाव	गच्छाम

लङ्

प्र० पु०	अगच्छत्	अगच्छताम्	अगच्छन्
म० पु०	अगच्छ	अगच्छतम्	अगच्छत
उ० पु०	अगच्छम्	अगच्छाव	अगच्छाम

विधिलिङ्

प्र० पु०	गच्छेत	गच्छेताम्	गच्छेयु:
म० पु०	गच्छे:	गच्छेतम्	गच्छेत
उ० पु०	गच्छेयम्	गच्छेव	गच्छेम

लृट्

प्र० पु०	गमिष्यति	गमिष्यत:	गमिष्यन्ति
म० पु०	गमिष्यसि	गमिष्यथ:	गमिष्यथ
उ० पु०	गमिष्यामि	गमिष्याव:	गमिष्याम:

गम् + णिच्—अवबोधने (समझाना); गमयति, "द्वौ नञौ प्रकृतार्थं गमयत:" । अति + गम्—अतिक्रमे । अधि + गम्—प्राप्तौ; ज्ञाने च । अनु + गम—अनुसरणे । अप + गम्—अपसरणे, दूरीभावे । अव + गम्–ज्ञाने । आ + गम्–आगमने; प्राप्तौ च । उप + आ + गम्–मिलने । उत् + गम्—उद्भवे । प्रति + उत् + गम्—प्रत्युद्गतौ, सम्मानार्थं पुरोपुरोगमने । उप + गम्–प्राप्तौ । अभि + उप + गम् + स्वीकार । निर् + गम्—बहिर्गगने । परि + गम्–प्राप्तौ; ज्ञाने; वेष्टने च । सम् + गम्—मिलन; 'साधु: साधुभि: सह सङ्गच्छते' (२) योग्यतायाञ्च; 'तन्न सङ्गच्छते' ।

पा पाने—पीना

लट्

पिबति पय: पान्थ:

	एकवचन	द्विवचन	बहुवचन
प्र० पु०	पिबति	पिबत:	पिबन्ति
म० पु०	पिबसि	पिबथ:	पिबथ
उ० पु०	पिबामि	पिबाव:	पिबाम:

लोट्

	एकवचन	द्विवचन	बहुवचन
प्र० पु०	पिबतु	पिबताम्	पिबन्तु
म० पु०	पिब	पिबतम्	पिबत
उ० पु०	पिबानि	पिबाव	पिबाम

लङ्

प्र० पु०	अपिबत्	अपिबताम्	अपिबन्
म० पु०	अपिबः	अपिबतम्	अपिबत
उ० पु०	अपिबम्	अपिबाव	अपिबाम

विधिलिङ्

प्र० पु०	पिबेत्	पिबेताम्	पिबेयुः
म० पु०	पिबेः	पिबेतम्	पिबेत
उ० पु०	पिबेयम्	पिबेव	पिबेम

लृट्

प्र० पु०	पास्यति	पास्यतः	पास्यन्ति
म० पु०	पास्यसि	पास्यथः	पास्यथ
उ० पु०	पास्यामि	पास्यावः	पास्यामः

दृश (दृशिर्) प्रेक्षणे (ज्ञाने, साक्षात्कारे)—देखना

पश्यति मन्दिरं पुरुषः । 'आत्मवत् सर्वभूतेषु यः पश्यति स पण्डितः' ।

पशुः पश्यति गन्धेन, बुद्धया पश्यन्ति पण्डिताः ।
राजा पश्यति कर्णाभ्यां भूते पश्यन्ति बर्बराः ।।

लट्

	एकवचन	द्विवचन	बहुवचन
प्र० पु०	पश्यति	पश्यतः	पश्यन्ति
म० पु०	पश्यसि	पश्यथः	पश्यथ
उ० पु०	पश्यामि	पश्यावः	पश्यामः

लोट्

प्र० पु०	पश्यतु	पश्यताम्	पश्यन्तु
म० पु०	पश्य	पश्यतम्	पश्यत
उ० पु०	पश्यानि	पश्याव	पश्याम

लङ्

प्र० पु०	अपश्यत्	अपश्यताम्	अपश्यन्
म० पु०	अपश्यः	अपश्यतम्	अपश्यत
उ० पु०	अपश्यम्	अपश्याव	अपश्याम

विधिलिङ्

प्र० पु०	पश्येत्	पश्येताम्	पश्येयुः
म० पु०	पश्येः	पश्येतम्	पश्येत
उ० पु०	पश्येयम्	पश्येव	पश्येम

लृट्

प्र० पु०	द्रक्ष्यति	द्रक्ष्यतः	द्रक्ष्यन्ति
म० पु०	द्रक्ष्यसि	द्रक्ष्यथः	द्रक्ष्यथ
उ० पु०	द्रक्ष्यामि	द्रक्ष्यावः	द्रक्ष्यामः

अनु + दृश्—आलोकने (देखना); आलोचनायाञ्च। उप, परि, प्र, सम् + दृश + णिच्—प्रदर्शने (दिखलाना); उपदर्शयति।

अभ्यास

संस्कृत में अनुवाद करो—बालक चन्द्र देखता है। कौन जल पीता है ? बच्चा तू जा; वह भी जाय, परन्तु मैं नहीं जाऊँगा। वे कल पढ़ने (पठितुं) गये थे; तू गया था क्या ? यदि श्याम आवे, तो मैं भी जाऊँगा। पहले इसे देखो, पीछे जल पीना। शरीर की पुष्टि के लिए घृत पान करना चाहिए। कभी मद्य नहीं पीना। प्रणिधान से क्या देखते हो ? मैं शीघ्र उस देश को देखूँगा। तू जल पीयेगा क्या ? अच्छी तरह इतिहास पढ़ो। मेहमान एक दिन से अधिक नहीं ठहरता। घर जाकर खाना खाओ। कल

पाठशाला देखने के लिए अधीक्षक महोदय आयेंगे। उत्तर प्रदेश-शासन की हिन्दी समिति उत्तमोत्तम हिन्दी पुस्तकों पर प्रति वर्ष पुरस्कार देती है। विद्या विनय देती है। एक अक्षर की भी शिक्षा जिससे पाते हो उसे गुरुवत् मानो।

भ्वादि सकर्मक परस्मैपदी धातु

अञ्च् (अञ्चु) गतौ; पूजने च—(१) जाना; (२) पूजा या आदर करना—अञ्चति; अञ्चिष्यति (१) "स्वतन्त्रता कथमञ्चसि ?" (२) "भीमोऽयं शिरसाऽञ्चति"।

अट् भ्रमणे—घूमना—अटति; अटिष्यति। "महीमटति परिव्राट्।" "अटति ग्रामीणो जनः।"

परि+अट्—पर्यटने; "तीर्थानि पर्यटस्व"। अर्च् पूजायाम्—पूजा करना—अर्चति, अर्चिष्यति। "रत्नपुष्पोपहारेण च्छायामानर्च पादयोः।"

अर्ज् अर्जने—कमाना—अर्जति, अर्जिष्यति। "यदघमर्जति दाता"। "धनमर्जन्ति विद्वांसः।"

अर्द् गतौ; याचने; पीडने च—(१)जाना;(२)माँगना;(३) सताना, मारना—अर्दति, अर्दिष्यति। (२) 'शरद्घनं नार्दति चातकोऽपि"।

अर्ह् योग्यत्वे; पूजने च—(१) योग्य होना, (२) पूजा करना—अर्हति; अर्हिष्यति। (१) दण्डमर्हति दुर्वृत्तः, (अकर्मक) "अर्हति विप्रो वेदं पठितुम्।"

'तुमुनन्त'—पद के साथ मध्यमपुरुष में और कभी प्रथमपुरुष में प्रयुक्त होने से, 'अर्ह्'—धातु—मृदु अनुज्ञा, उपदेश, वा विनीत प्रार्थना सूचित करता है; यथा—"द्वित्राण्यहान्यर्हसि सोढुमर्हन्।" "नार्हसि मे प्रणयं विहन्तुम्।" "तं सन्तः श्रोतुमर्हन्ति।"

अव् रक्षणे; प्रीणने च—(१) रक्षा करना; (२) प्रसन्न करना (खुश करना)—अवति; अविष्यति। (१) "अवतु वो गिरिसुता"; (२)"न मामवति सद्वीपा रत्नसूरपि मेदिनी।""अवतु मां पापेभ्यः।"

इ गतौ—अयति; एष्यति ।

उत्+इ—उदये; "उदयति विततोर्ध्वरश्मिरज्जावहिमरुचौ हिमधाम्नि याति चास्तम् । वहति गिरिरयं विलम्बिघण्टाद्वयपरिवारितवारणेन्द्रलीलाम् ।" "अयमुदयति मुद्राभञ्जनः पद्मिनीनाम्", "उदयति यदि भानुः पश्चिमे दिग्विभागे ।"

उक्ष् सेचने—सींचना—उक्षति, उक्षिष्यति । उक्षति वृक्षं मेघः ।

अभि+उक्ष्, प्र+उक्ष्—समन्तात् वारिबिन्दुप्रक्षेपे (छिड़कना), "प्रोक्षितं भक्षयेन्माँसम्" ।

ऋ गतौ; प्राप्तौ च—(१)जाना, (२)पाना—ऋच्छति; अरिष्यति । (२) "ऋच्छति धनं कृती"; "चाण्डालपुक्कसानाञ्च ब्रह्महा योनिमृच्छति ।"

ऋ+णिच् (१) दाने; (२) स्थापने च; अर्पयति । (३) "अपथे पदमर्पयन्ति हि श्रुतवन्तोऽपि रजोनिमीलिताः" "धनमर्पयन्ति राजानः।"

कष्-(१) हिंसायाम्; (२) घर्षणे (३) परीक्षणे (निकषोपरि घर्षणेन स्वर्णस्य)—कसौटी पर घिसकर सुवर्णकी परीक्षा करना । कषति, कषिष्यति । "छदहेम कषन्निवालसत् कषपाषाणनिभे नभस्तले ।"

कस् गतौ—कसति; कसिष्यति ।

वि+कस्—विकासे (खिलना और विस्तृत होना—अकर्मक) "विकसति हि पतङ्गस्योदये पुण्डरीकम् ।" वि+कस्+णिच् विकासयति; "कोपकुसुमं व्यचीकसत् ।" "चन्द्रो विकासयति कैरवचक्रवालम् ।" प्र+नि+कस्—प्रकाशे । निर्+कस्+णिच्—निःसारणे; निष्कासयति । "विद्युदुत्पादनगृहस्थो नलो धूम्रं निष्कासयति ।"

काङ्क्ष् (कांक्षि) वाञ्छायाम्—आकाङ्क्षा करना, चाहना, माँगना—काङ्क्षति; काङ्क्षिष्यति । "काङ्क्षति धनं दरिद्रः ।

आ+काङ्क्ष्—आकाङ्क्षायाम् ।

कित्+रोगापनयने (व्याधिप्रतीकारे)—इलाज करना—चिकित्सति; चिकित्सिष्यति ।

वि + कित्—संशये । "नाहं विचिकित्सामि तत्त्वनिर्णये ।"

कृष् आकर्षणे; विलेखने च—(१) खींचना,(२) जोतना—कर्षति; कर्क्ष्यति, क्रक्ष्यति । (१) कर्षन्ति तुरगा रथम्; (२) इक्षुक्षेत्रं कर्षति कृषीबलः । (३) प्रापणे द्विकर्मकः—कर्षति शाखां ग्रामम् ।

आ + कृष्, वि + कृष्—आकर्षणे । अप + कृष्—अपसारणे (हटाना), नाशने; "धैर्य्यं शोकोऽपकर्षति" (२) न्यूनीकरणे च (घटाना) । उत् + कृष्—उत्तोलने; उद्धरणे (निकाल लेना, छुड़ाना); आकर्षणे, वर्द्धने च (बढ़ाना) । निर् + कृष् बलाद्ग्रहणे, आहरणे च । प्र + कृष्, उत् + कृष्—कर्मकर्त्तरि—आधिक्ये, वृद्धौ, श्रेष्ठतायाम् । वि + प्र + कृष्-दूरीकरणे ।

क्रम् (क्रमु) पादविक्षेपे (गतौ)—कदम रखना, चलना-क्रामति क्राम्यति, क्रम्यति; क्रमिष्यति । आक्रमणे च, "कृष्णोरगौ पदा क्रामसि पुच्छदेशे ।"

अति + क्रम्—(१) उल्लङ्घने (पार होना); (२) अतिवाहने (व्यतीत करना, काटना); (३) अत्यये च (गुजरना—अकर्मक); यथा—(२) "आहारवेलां नातिक्रामेत्"; (३) अतिक्रामति देवार्चन-विधिवेलाम् ।" वि + अति + क्रम=उल्लङ्घने, भङ्गे (तोड़ना) । "कृच्छ्रेष्वपि न मर्यादां व्यतिक्रमेत्"। अप् + क्रम्—अपसरणे (हटना)। आ + क्रम्—आक्रमणे । उत् + क्रम्—उद्गमने, अतिक्रमे च । उप + क्रम्, प्र + क्रम्—आरम्भे, आत्मनेपदी—उपक्रमते, प्रक्रमते । निर् + क्रम्—निर्गमने । परा + क्रम्, वि + क्रम्—शौर्य्याविष्कारे (बहादुरी या हिम्मत दिखाना) "वकवच्चिन्तयेदर्थान् सिंहवच्च पराक्रमेत्" । परि + क्रम्–इतस्ततः पादचारे (चलना-फिरना) । सम् + क्रम्—प्रवेशे ।

खाद् भक्षणे—खाना—खादति; खादिष्यति । "खादति पृष्ठ-मांसम्" (चुगली खाता है) ।

गद् भाषणे–कहना–गदति; गदिष्यति । "वेदान् गदति विस्पष्टम्" । नि + गद्—कथने । "निगदति पूर्ववृत्तम् ।"

गुप् (गुपू) रक्षणे—रक्षा करना, बचाना—गोपायति, गोप्स्यति, गोपिष्यति, गोपायिष्यति। "गोपायन्ति कुलस्त्रिय आत्मानम् आत्मना"।

गै गाने (कीर्त्तने)-गाना-गायति; गास्यति। "गीतं गायति गायकः"। "प्राणरक्षणाच्च न परं पुण्यजातं जगति गीयते जनेन"। उत्+गै—उच्चैर्गाने। परि+गै—कीर्त्तने। वि+गै—निन्दायाम्।

घृष् (घुषु) घर्षणे—घिसना—घर्षति; घर्षिष्यति। घर्षति चन्दनं लोकः।

घ्रा—गन्धग्रहणे (आघ्राणे)—सूँघना-जिघ्रति; घ्रास्यति। जिघ्रति पुष्पं लोकः। "दीपनिर्वाणगन्धश्च न जिघ्रन्ति गतायुषः।"

अव, आ, उप+घ्रा—आघ्राणे।

चम् (चमु) भक्षणे—खाना; पीना—चमति, चमिष्यति। "चचाम मधु माध्वीकम्"। "चमति श्वानः अस्थिकम्"।

आ+चम्-आचमने; आचामति। पाने-"मण्डम् आचामति मृगः।"

चर् गतौ (भ्रमणे); भक्षणे च—(१) विचरना;(२) खाना;-चरति चरिष्यति। "नष्टाशङ्का हरिणशिशवो मन्दमन्दं चरन्ति"; (२) गावः तृणानि चरन्ति। (३) आचरणे; "शम्बूको नाम तपश्चरति"।

अति+चर्—लङ्घने, अतिक्रमणे च। अनु+चर्—अनुगमने; सेवायाञ्च। अभि+चर्—(१) अतिक्रमे, "पतिं या नाभिचरति"। (२) मारणे च; "श्येनेनाभिचरन्"। वि+अभि+चर्—अतिक्रमे; अन्यथाभावे च। आ+चर्—व्यवहारे; "जानन्नपि हि मेधावी जडवल्लोक आचरेत्"। सम्+आ+चर्—अनुष्ठाने, करणे। उत्+चर्—उदये (उठना); मूत्रपुरीषोत्सर्गे, उच्चारणे च। उत्+चर्+णिच्—उच्चारणे उच्चारयति। उप+चर्—पूजायाम्, सेवायाम्। परि+चर्—सेवायाम्। वि+चर्—भ्रमणे। वि+चर्+णिच्—मीमांसायाम्, निर्णये; विचारयति। सम+चर्—गमने; करणकारक का प्रयोग होने से आत्मनेपदी—अश्वेन सञ्चरते।

चुम्ब्—(चुबि) वक्त्रसंयोगे (चुम्बने) चूमना—चुम्बति, चुम्बिष्यति। चुम्बति बालं माता। "श्मश्रुकण्टक-वेधेन बाले रुदति तत्पिता। चुम्बत्येव न सा प्रीतिः बालार्थे स्वार्थ एव सा।"

चूष-पाने—चूसना—चूषति। चूषत्याम्रं लोकः।

जप्—मानसे (हृदुच्चारे)—जप करना—जपति; जपिष्यति "मन्त्रं जपति साधकः।"

उप+जप्—भेदे।

जल्प कथने—कहना, बात करना—जल्पति; जल्पिष्यति। "एकेन जल्पन्त्यनल्पाक्षरम्"।

जि—अभिभवे; उत्कर्षप्राप्तौ च—(१) जीतना (२) जययुक्त होना (अकर्मक)—जयति; जेष्यति। (१) जयति शत्रुं बली; (२) "जयति रघुवंशतिलकः।"

निर्+जि—अभिभवे; परा+जि—पराजये; आत्मनेपदी; पराच जयते। वि+जि—(१) पराभवे (सकर्मक); (२) उत्कर्षप्राप्तौ (अकर्मक) आत्मनेपदी; विजयते; यथा—(१) "चक्षुर्मेचकमम्बुजं विजयते।" (२) "भो राजन्! विजयतां भवान्।"

तक्ष् (तक्षु)—तनू करणे (कृशीकरणे)—छीलना; कतरना—तक्षति, तक्ष्णोति; तक्षिष्यति, तक्ष्यति। तक्षति तक्ष्णोति काष्ठं तक्षा।

तप्—सन्तापे (दाहे, शोके)—सन्तापित करना (दुःखाना—सकर्मक) सन्तप्त होना (दुःख पाना—अकर्मक)—तपति; तप्स्यति। "तपति तनुगात्रि! मदनस्त्वाम्"। "तपति न सा किसलयशयनेन"। प्रकाशेऽपि—रविस्तपति। अर्जनार्थे आत्मनेपदं यक् च—"तप्यते तपस्तापसः।"

अनु+तप्—कर्मकर्त्तरि—पश्चात्तापे (अकर्मक) अनुतप्यते। परि+तप्—परितापे, व्यथायाम् (कर्मकर्त्तरि); 'परितप्यते नोत्तमः परवृद्धिभिः'। सम्+तप्—सन्तापे (कर्मकर्त्तरि); "दिवाऽपि मयि निष्क्रान्ते सन्तप्येते गुरू मम"।

तॄ—तरणे (अतिक्रमणे); प्लवने (जलोपरि स्थितौ) च—(१) पार होना; (२) तैरना (अकर्मक)—तरति; तरिष्यति। (१) तरति नदीं भेलकेन पान्थः; "तरति सकलदुःखं वामनं भावयेद्यः।" (२) तरति शुष्ककाष्ठं जले।

अति+तॄ—अतिक्रमे। अव+तॄ—अवरोहणे (उतरना)। उत्+तॄ, निर्+तॄ—अतिक्रमे; निस्तरति। प्र+तॄ+णिच्—वञ्चने (ठगना); प्रतारयति। वि+तॄ—दाने। सम्+तॄ—सन्तरणे (तैरना); अतिक्रमे च; "सर्वं ज्ञानप्लवेनैव वृजिनं सन्तरिष्यसि।"

त्यज्—त्यागे—छोड़ना—त्यजति; त्यक्ष्यति। त्यजति दुष्टलोकं जनः। परि+त्यज्, सम्+त्यज्—वर्जने।

दंश् (दन्श्)—दंशने (दन्तव्यापारे)—डसना, काटना; दशति, दङ्क्ष्यति। "पदा स्पृशन्तं दशति द्विजिह्वः"; "दशति बिम्बफलं शुकशावकः।"

दह्—भस्मीकरणे, दाहे; सन्तापे च—(१) जलाना; (२) दुःख देना—दहति; धक्ष्यति। (१) दहत्यग्निः काष्ठम्; (२) "आत्मकृतमप्रतिहतं चापलं दहति"।

निर्+दह्—दाहे; प्रणाशे च, "एनो निर्दहत्याशु तपसा"।

दा (दाण्) दाने—देना—यच्छति; दास्यति।

प्र+दा प्रदाने। प्रयच्छति।

द्रु—गतौ (पलायने); द्रवीभावे च–(१) जाना, भागना; (२) पिघलना (अकर्मक)—द्रवति; द्रोष्यति(१)"नद्यः समुद्रं द्रवन्ति"। "रक्षांसि भीतानि दिशो द्रवन्ति"(२)"द्रवति च हिमरश्मावुद्गते चन्द्रकान्तः"।

अनु+द्रु—अनुसरणे। उप+द्रु—अभिमुखधावने आक्रमणे च। प्र+द्रु, वि+द्रु—पलायने।

धे (धेट्) पाने—पीना—धयति; धास्यति। "न वारयेद् गान्धयन्तीम्"। "धयति पानीयं वटुः"।

ध्मा + शब्दे (शङ्खादिवादने); अग्निसंयोगे (अग्नेरुज्ज्वलीकरणे, अग्निफूत्कृतौ च) फूँकना, धौंकना—धमति; धास्यति। "धमति शङ्खं जनः" (सशब्दं करोति); "धमति सुवर्णं वणिक्" (अग्नि-संयुक्तं करोति); "को धमेच्छान्तश्च पावकम्" ?

आ + ध्मा—स्फीतौ (फूलना); दर्पाध्मात; "अध्मातमुदरं भृशम्"।

ध्यै–चिन्तने—ध्यान करना—ध्यायति; ध्यास्यति। "ध्यायति विष्णुं वैष्णवः" 'ध्यायत्यनिष्टं चेतसा'।

अनु + ध्यै—चिन्तायाम्; अनुग्रहे च। नि + ध्यै–स्मरणे; दर्शने च; "चिरं निदध्यौ दुहतः स गोदुहः"।

नम् (णम्)–नतौ, नमस्करणे; नम्रीभावे च;—(१) नमस्कार करना (सकर्मक); (२) झुकना (अकर्मक)—नमति; नमस्यति। (१) नमति गुरुं शिष्यः (२) "नमन्ति फलिनो वृक्षाः"।

अव, आ + नम्—अवनतौ। उत् + नम्—उन्नतौ। उप + नम्—उपस्थितौ। परि + नम् + परिपाके, जीर्णीभावे–'शाखाभृतां परिणमन्ति न पल्लवानि", रूपान्तरीभावे च (तृतीया के साथ) "क्षीरं जलं वा स्वयमेव दधिहिमभावेन परिणमते"।

वि + परि + नम्—विरूपावस्थायाम्। प्र + नम्—प्रणामे (प्रणमति चरणाब्जे)।

निन्द् (णिदि)–कुत्सायाम्—निन्दा करना—निन्दति; निन्दिष्यति। निन्दति दुष्टं लोकः, 'निन्दन्तु नीतिनिपुणा यदि वा स्तुवन्तु।"

पठ्–पाठे (पठने)–पढ़ना—पठति; पठिष्यति। पठति श्लोकं बालकः; पठिष्यामि राष्ट्रभाषाम्।

भण—कथने—कहना—भणति; भणिष्यति। "छिन्नबन्धे मत्स्ये पलायिते निर्विण्णो धीवरो भणति—धर्मो मे भविष्यतीति"।

म्ना–अभ्यासे (पौनःपुन्येनानुशीलने) आवृत्ति करना, दुहराना—मनति; म्नास्यति। "मनति सन्ध्यां ब्राह्मणः"।

आ + मन्—आवृत्तौ, उक्तौ च; "प्रायश्चित्त इव राजदण्डेऽप्येनसो निष्क्रयमामनन्ति धर्माचार्य्याः" ।

रक्ष्-पालने (रक्षणे)—पालना, बचाना, रक्षा करना—रक्षति; रक्षिष्यति । "आत्मानं सततं रक्षेद् दारैपि धनैरपि" ।

लप्-कथने-कहना-लपति; लपिष्यति । "लपति स्निग्धया वाचा ।"

अप + लप्—अपह्नवे, अस्वीकारे (इनकार करना) । अभि-लप्-कथने । आ + लप्—आलापे (बातचीत करना) प्र + लप्—प्रलापे, अनर्थवाक्ये (बकना) । वि + लप्—विलापे (अफसोस करना) । सम् + लप्—मिथोभाषणे ।

लिङ्ग (लिगि) गतौ—लिङ्गति, लिङ्गिष्यति । "लिङ्गति माता पुत्रम्" । आ + लिङ्ग—आलिङ्गने (गले लगाना) ।

वद् कथने—बोलना—वदति, वदिष्यति । "सत्यं वदति सर्वत्र"; "वद, प्रदोषे स्फुटचन्द्रतारका विभावरी यद्यरुणाय कल्पते ।"

वद् + णिच्—वादने (बजाना); वादयति; "वादयते मृदु वेणुम्" । अनु + वद्—अनुकरणे; पुनः कथने च । अप + वद्-निन्दायाम् । अभि + वद् + णिच्—अभिवादने, प्रणामे च; "भगवन् अभिवादये"; "तात ! प्राचेतसान्तेवासी लवोऽभिवादयते" । परि + वद्—निन्दायाम् । प्रति + वद्—प्रतिवचने (जबाब देना) । वि + वद्—कलहे; आत्मनेपदी; विवदते । सम् + वद्—सादृश्ये । वि + सम् + वद्—वैलक्षण्ये, विरोधे !

वम्-(टुवम्)-उद्गिरणे (वमने)—उबकना-वमति, वमिष्यति । "फणी पीत्वा क्षीरं वमति गरलम्" ।

उत् + वम्—निःसारणे प्रकटने ।

वाञ्छ् (वाछि)—कामे—इच्छा करना—वाञ्छति, वाञ्छिस्यति । "(धनुर्भृतस्तस्य) प्रियाणि वाञ्छन्त्यसुभिः समीहितुम् ।"

वृष् (वृषु)—सेचने (बर्षणे)—बरसाना—वर्षति; वर्षिष्यति । "वर्षतीवाञ्जनं नभः" । "काले वर्षन्तु मेघाः" (अकर्मक) ।

व्रज् गतौ—(१) जाना; (२) पाना–व्रजति; व्रजिष्यति। (१) "नाविनीतैर्व्रजेद्धुर्य्यैः"; "इयं व्रजति यामिनी, त्यज नरेन्द्र ! निद्रा-रसम्"; (२) 'व्रजति शुचिपदं त्वयि प्रीतिमान्"; "मामेकं शरणं व्रज"।

अनु+व्रज्–अनुगमने; समीपगतौ, आश्रये, सहवासे च–"मृगा मृगैः सङ्गमनुव्रजन्ति"। परि+व्रज्—सन्न्यासपूर्वकभ्रमणे। प्र+व्रज्—सर्वसङ्गत्यागपूर्वक–चतुर्थाश्रमग्रहणे। प्र+व्रज्+णिच्–प्रवासने, निर्वासने; "चतुर्दश समा रामं प्राव्राजयत्"।

शंस् (शन्सु)—कथने; स्तुतौ च—(१) कहना; (२) प्रशंसा करना शंसति; शंसिष्यति। (१) 'न मे ह्रिया शंसति किञ्चिदीप्सितम्"; (२) "साधु साध्विति भूतानि शशंसुर्मारुतात्मजम्"।

आ+शंस्—कथने। प्र+शंस्—प्रशंसायाम्।

शुच्–शोके (पुत्रादेरदर्शनाद् दुःखानुभवे)—शोक करना, गम खाना—शोचति; शोचिष्यति। "न शोचति सदाचारी यो मृतानपि बान्धवान्" "मा शुचः सम्पदं दैवीमभिजातोऽसि भारत।"

अनु+शुच्—अनुशोचने (अफसोस करना); "नष्टं मृतमतिक्रान्तं नानुशोचन्ति पण्डिताः"। "गतासूनगतासूँश्च नानुशोचन्ति पण्डिताः"।

ष्ठिव (ष्ठिवु) निरसने (मुखेन श्लेष्मादेर्वमने)—थूकना, उगलना—ष्ठीवति; ष्ठेविष्यति। "पीतमिन्दुं ष्ठीवाम्"। यह दिवादिगणीय परस्मैपदी भी होता है; ष्ठीव्यति।

नि+ष्ठिव्—निष्ठीवने (थूकना); निक्षेपे च।

सिध् (षिधु) गत्याम्—जाना—सेधति; सेधिष्यति।

सिध् (षिधू) शासने; माङ्गल्ये च—सेधति, सेत्स्यति, सेधिष्यति।

नि+सिध्, प्रति+सिध्—निवारणे (रोकना); निषेधति प्रतिषेधति।

सृ-गतौ—चलना—सरति (वेगगमने—धावति), सरिष्यति।

अनु+सृ—अनुगमने। अप+सृ—पलायने (भागना, हटना

सरकना)। अभि + सृ–सङ्केतस्थानगमने ('णिच्'—भी होता है)। उत् + सृ + णिच्—दूरीकरणे; उत्सारयति। उप + सृ—समीपगमने। निर् + सृ—निष्क्रमणे (निकलना); निःसरति। प्र + सृ, वि + सृ—व्याप्तौ। सम् + सृ—देहधारणे।

सृप् (सृप्लृ)—गतौ—सर्पति; सप्स्र्यति, स्रप्स्यति।

अप + सृप्–अपसरणे। उत् + सृप्–ऊर्ध्वगमने; उल्लङ्घने च। उप + सृप्—समीपगमने। प्र + सृप्, वि + सृप्–गमने; विस्तारे च (फैलना)। सम् + सृप्—सङ्क्रमणे, सञ्चारे।

स्कन्द (स्कन्दिर्)—गतौ, शोषणे च—स्कन्दति, स्कन्दिष्यति। सशब्दोऽयं स्कन्दति वनम्।

अव + स्कन्द्, आ + स्कन्द्—आक्रमणे। प्र + स्कन्द्—लम्फप्रदाने (कूदना); पतने च—"तस्य रेतः प्रचस्कन्द"। स्कन्द् + णिच्—निःस्सारणे, विमोचने, पातने; "एकः शयीत सर्वत्र न रेतः स्कन्दयेत् क्वचित्"।

स्मृ—चिन्तायाम् (स्मरणे)—याद करना—स्मरति; स्मरिष्यति। हरिं स्मरति मुमूर्षुः।

वि + स्मृ—विस्मरणे (भूलना)।

अभ्यास

संस्कृत में अनुवाद करो—राष्ट्रपति चले गये। चोर भागा। नमस्य को नमस्कार करना उचित है। किसी को कटुवाक्य नहीं कहना चाहिए। साधु लोग तीर्थ पर्य्यटन करते हैं। जो धर्म का (द्वितीया) आचरण करता है, छोटे-बड़े सब उसका (द्वितीया) आदर करते हैं। पुत्र-शोक से कौशल्या देवी ने विलाप किया था। शरणागत का (द्वितीया) परित्याग करना नहीं चाहिए। प्रातःकाल में प्रतिदिन (अनुनिम्) अपना पाठ पढ़ना उचित है। ईश्वर हमारी (द्वितीया) रक्षा करेंगे। जननी पुत्र के मुख का चुम्बन करती है। राजा दशरथ ने राम के लिये अत्यन्त शोक किया। जापान पुनः बलवान हो गया है। ब्रह्मदेश-निवासी बौद्ध हैं।

भ्वादि अकर्मक परस्मैपदी धातु

इङ्ग (इगि) गतौ (चलते, कम्पने)-चलना, हिलना—इङ्गति, इङ्गिष्यति। "त्वया सृष्टमिदं विश्वं यच्चेङ्गं यच्च नेङ्गति।" "यथा दीपो निवातस्थो नेङ्गते" आत्मनेपदम् आर्षम्।

एज् (एजृ)—कम्पने—काँपना, विचलित होना-एजति; एजिष्यति। "धृतराष्ट्रोऽयमेजति"।

कूज्—अव्यक्तशब्दे (कूजने)—चहचहाना—कूजति; कूजिष्यति। कूजति कोकिल:; 'चुकूज कूले कलहंसमण्डली।"

क्रन्द् (क्रदि)—रोदने—रोना—क्रन्दति; क्रन्दष्यति। "मा पित: क्रन्द मा तात"। (२) सकरुणाह्वाने च (रोकर पुकारना-सकर्मक) "क्रन्दत्यविरतं सोऽथ भ्रातृमातृसुतान्"।

आ+क्रन्द्+रोदने; आह्वाने च।

क्रीड्—विहारे (खेलने)-खेलना—क्रीडति, क्रीडिष्यति। क्रीडति बाल: शिशुभि:।

क्रुश्—रोदने, आह्वाने च (चीत्कारे) च—(१) रोना, (२) चिल्लाना—क्रोशति, क्रोक्ष्यति। (२) "एष क्रोशति दात्यूह:"।

आ+क्रुश्—(१) चीत्कारे, (२) भर्त्सने च, "शतं ब्राह्मणमाक्रुश्य क्षत्रियो दण्डमर्हति"। वि+क्रुश्—चीत्कारे, "आक्रोश विक्रोश, लपाधिचण्डम्"।

क्वण् शब्दे (वीणादिरवे)—झङ्कारना—क्वणति, क्वणिष्यति। "क्वणन्मणिनूपुरौ"।

क्षर्—स्रवणे, मोचने च—(१) बहना, झरना, टपकना, (२) बहाना, निकालना (सकर्मक)—क्षरति, क्षरिष्यति। (१) क्षरति क्षतजं क्षतात्, (२) "स्रोतोभिस्त्रिदशगजा मदं क्षरन्त:।"

खेल् (खेऌ) क्रीडायाम्—खेलना—खेलति, खेलिष्यति। खेलति सखिजन:।

"भास्वत्कन्या सैका धन्या,
यस्याः कूले कृष्णोऽखेलत् ।"

गर्ज्—शब्दे (गर्जने)—गरजना । गर्जति, गर्जिष्यति । गर्जति सिंहः, गर्जति वारिदपटली, "गर्जति शरदि न वर्षति, वर्षति वर्षासु निःस्वनो मेघः ।"

गल्—क्षरणे, पतने च—(१) झरना, (२) गिरना—गलति, गलिष्यति । (१) "स्वयं हाहाकारा गलति जलधारा कुवलयात्" (२) "प्रतोदा जगलुः" । (३) नाशे; "किं शास्त्रं ? श्रवणेन यस्य गलति द्वैतान्धकारोदयः ।"

निर+गल्—निःसरणे; निष्कषर्पे च—इति निर्गलितोऽर्थः । वि+गल्—भ्रंशे ।

गुञ्ज् (गुजि)-अव्यक्तशब्दे (गुञ्जने)—गुनगुनाना, भिनभिनाना-गुञ्जति; गुञ्जिष्यति । भ्रमरोऽयं गुञ्जति भृशम् ।

अपि दलदरबिन्द ! स्यन्दमानं मरन्दं तव किमपि लिहन्तो मञ्जु गुञ्जन्तु भृङ्गाः" ।

ग्लै-विषादे क्लमे च—उदास होना, थकना—ग्लायति, ग्लास्यति ग्लायति लोकः शोकात् ।

चञ्च् (चञ्चु) चलने—चलना, हिलना—चञ्चति । "चण्डि चञ्चन्ति वाताः" ।

चल्-कम्पने (अस्थैर्ये) गतौ च—(१) काँपना (अस्थिर होना) हिलाना; (२) जाना (सकर्मक) चलति, चलिष्यति । (१) "न चलति खलु वाक्यं सज्जनानां कदाचित्", (२) "चल सखि ! कुञ्जम्" ।

उत्+चल्—प्रस्थाने । प्र+चल्—गमने, कम्पे प्रसिद्धौ च । वि+चल्—कम्पे, क्षोभे भ्रंशे च ।

च्युत् (च्युतिर्) क्षरणे (स्खलने च)—चूना, गिरना-च्योतति, च्योतिष्यति । च्योतति रसं पात्रात् ।

जीव् (१) प्राणधारणे (जीवने)—जीता रहना—जीवति; जीविष्यति। "त्वयि जीवति जीवामि।" (२) जीविकानिर्वाहे (गुजारा करना); "स्वाहारात् किञ्चिदुद्धृत्य ददाति, तेनासौ जीवति।

चौराः प्रमत्ते जीवन्ति, व्याधितेषु चिकित्सकाः।
प्रमदाः कामयानेषु, यजमानेषु याचकाः।
राजा विवदमानेषु नित्यं मूर्खेषु पण्डिताः॥

अनु + जीव्, उप + जीव्—आश्रये। उत् + जीव-पुनर्जीवने। सम् + जीव—जीवने।

ज्वर् रोगे—रोग-ग्रस्त होना, बीमार होना; ज्वर युक्त होना—ज्वरति; ज्वरिष्यति। "एतस्मिन् भ्रान्तिकालेऽयं शरीरेषु ज्वरत्स्वथ। स्वयमेव ज्वरामीति मन्यते हि कुटुम्बिवत्।"

ज्वल् दीप्तौ (ज्वलने) —जलना-ज्वलति; ज्वलिष्यति। ज्वलति वह्निः।-दाहे; "धिगिदमंशुकं ज्वलति।"

उत् + ज्वल्, प्र + ज्वल्—दीप्तौ।

दल् (१) भेदे—फटना-दलति; दलिष्यति। "दलति न सा हृदि विरहभरेण।"—(२) विकासे (खिलना); "दलन्नवनीलोत्पलश्यामलं देहसौभाग्यम्।"

ध्वन् रवे-ध्वनि करना; बजाना-ध्वनति, ध्वनिष्यति। "अयं धीरं धीरं ध्वनति नवनीलो जलधरः।"

नट् नर्तने—नाचना—नटति। केन सह नटिष्यसि ?

नट् + णिच्—नटयति। "तत् त्वां पुनः पलितवर्णकभाजमेनं नाटयेन केन नटयिष्यति दीर्घमायुः।"

नद् (णद्) शब्दे—नाद करना—नदति। नदति घण्टा। "नवाम्बुमत्ताः शिखिनो नदन्ति।"

नन्द् (टुनदि) हर्षे—खुश होना—नन्दति; नन्दिष्यति। "ननन्द पश्यन्नुपसीम स स्थलीः।"

अभि + नन्द्—सत्कारे; प्रशंसायाम्; अनुमोदने; कामनायाञ्च।

आ + नन्द्—आनन्दे । प्रति + नन्द्—संवर्द्धने, सम्मानने । "भक्षये-दशनं नित्यं······प्रतिनन्देच्च सर्वशः ।"

फल् (१) निष्पत्तौ (पूर्त्तौ)—फलना, सफल होना–फलति; फलिष्यति । "भाग्यं फलति सर्वत्र ।" (२) निष्पादने (सकर्मक); "वाल्मीकिः फलति स्म दिव्या गिरः ।"

प्रति + फल्—प्रतिबिम्बने । मुखं प्रतिफलति दर्पणे ।

फुल्ल् विकासे—फूलना—फुल्लति । फुल्लति मल्लीकलिका ।

भ्रम् चलने (भ्रमणे)—घूमना—भ्रमति; भ्रमिष्यति । "भ्रमति भुवने कन्दर्पाज्ञा ।" क्वचित् सकर्मकोऽपि; "दिङ्मण्डलं भ्रमसि मानस ! चापलेन ।" "भिक्षां भ्रमति भिक्षुकः ।"

उत् + भ्रम्—परिभ्रमणे ।

मील् निमेषे (सङ्कोचे)—मूँद जाना, सिकुड़ना—मीलति; मीलिष्यति । मीलति चक्षुः (पक्ष्मभिरावृतं स्यात्); "मीलन्ति रिपुनारीणां मुखपद्मवनानि च ।"

उत् + मील्—उन्मेषे, विकासे । नि + मील—मुद्रणे ।

मूर्च्छ् (मूर्च्छा) मोहे (ज्ञानरहितीभावे); वृद्धौ च—(१) बेहोश होना; (२) बढ़ना—मूर्च्छति; मूर्च्छिष्यति (१) "मूर्च्छति रोगी मुहुर्मुहुः ।" (२) "मुमूर्च्छ सख्यं रामस्य ।"

म्लै कान्तिक्षये—मलिन होना, कुम्हलाना—म्लायति, म्लास्यति । म्लायति चन्द्रो दिवसे । "घनोष्मणा म्लायत्यलं लतेव मनस्विता ।"

यम् (१) उपरमे (निवृत्तौ)—उपरत या निवृत्त होना, परहेज करना–यच्छति; यंस्यति । यच्छति पापात् साधुः । (२) निग्रहे च (सकर्मक); "धियं यच्छ च बुद्धिसाक्षिणि ।"

आ + यम्—दीर्घीकरणे । उत् + यम्–उत्तोलने, उद्योगे च । उप + यम्–विवाहे, स्वीकारे च । सब आत्मनेपदी, यथा–आयच्छते, उद्यच्छते, उपयच्छते । नि + यम्—दमने, निवारणे, शासने, व्यवस्थापने । प्र + यम्—दाने । सम् + यम्—नियमने, बन्धने च ।

रस् शब्दे—आवाज करना—रसति, रसिष्यति । "करीव वन्यः

परुषं ररास;" "राजन्योपनिमन्त्रणाय रसति स्फीतं यशोदुन्दुभिः।" "रसतु रसना।"

रुह् उद्भवे—उत्पन्न होना—रोहति; रोक्ष्यति। "छिन्नोऽपि रोहति तरुः।"

रुह् + णिच्–रोपणे (रोपना; बोना); रोहयति, रोपयति। अधि + रुह् आ + रुह्—आरोहणे (चढ़ना—सकर्मक), "मूर्द्धानमधिरोहति" "सिंहासनमारुरोह।" अव + रुह्—अवतरणे (उतरना)। प्र + रुह्, वि + रुह्, सम् + रुह्–उत्पत्तौ; "न पर्वताग्रे नलिनी प्ररोहति।" वि + रुह् + णिच्—व्रणप्रशमने (घाव आराम करना); व्रणं विरोपयति।

लग् (लगे) सङ्गे—लगना—लगति; लगिष्यति। "ओष्ठेऽधरो लगति" "हंसस्य पश्चाल्लगति स्म।"

लड् विलासे (क्रीडायाम्)—खेलना—लडति। ड-लयोरेकत्वस्मरणात्—ललति। "पनसफलानीव वानरा ललन्ति।" "गजकलभा इव बन्धुला ललामः।"

लस् दीप्तौ—चमकना—लसति; लसिष्यति। "मुक्ताहारेण लसता हसतीव स्तनद्वयम्।" "भण मसृणवाणि! करवाणि चरणद्वयं सरसलसदलक्तकरागम्।"

उत + लस्—स्फुरणे। वि + लस्—प्रकाशे; क्रीडायाञ्च।

वल्ग् गतौ (चलने; प्लुतगतौ) (१) हिलना; (२) कूदना, उपटना, सरपट जाना—वल्गति; वल्गिष्यति। प्रतियोगिनोऽश्वा वल्गन्ति; (१) "वल्गदुत्तरीयःस्तनकम्प्रकञ्चुकम्।" (२) "ववल्गुश्च पदातयः।" "वल्गु वल्गन्ति सूक्तयः।" (३) नर्त्तने (नाचना); "द्वारे हेमविभूषणाश्च तुरगा वल्गन्ति यद् दर्पिताः।"

वस् निवासे—बसना; रहना–वसति; वत्स्यति। "वसति वने वनमाली।" "वसन्ति हि प्रेम्णि गुणा न वस्तुनि।"

अधि + वस्, आ + वस्—वासे (सकर्मक)।

उप + वस्–उपवासे, भोजननिवृत्तौ; "एकादशीमुपवसन्ति निरम्बुभक्षाः।" नि + वस्—निवासे। निर् + वस् + णिच्–निर्वासने, नगराद्-

बहिष्करणे (निकाल देना); निर्वासयति। प्र + वस्—विदेशावस्थाने। प्र + वस् + णिच्, वि + वस् + णिच्—निवासने। प्रति + वस्–निवासे। "अस्मिन् वने सिंहः प्रतिवसति।"

वेल्ल् कम्पने–हिलना, चलना-वेल्लति; वेल्लिष्यति। भयाद् वेल्लति बालिकाः। "उद्वेल्लन्ति पुराणचन्दनतरुस्कन्धेषु कुम्भीनसाः।"

श्च्युत् (श्च्युतिर्) क्षरणे—टपकना–श्च्योतति; श्च्योतिष्यति। मधुनो धाराः श्च्योतन्ति।

सञ्ज् (षन्ज्) सङ्गे (संश्लेषे)—सटना, चिपटना—सजति; सङ्क्षयति। "सजति वपुषि वासः।"

अनु + सञ्ज्—सम्बन्धे; आसक्तौ (कर्मकर्त्तरि); अनुषज्यते; "धर्म-पूते च मनसि नभसीव न जातु रजोऽनुषज्यते।" अव + सञ्ज्–योजने, स्थापने। प्र + सञ्ज्–आसक्तौ; "प्रसजन्निन्द्रियार्थेषु नरः पतनमृच्छति।" कर्मकर्त्तरि—प्रसङ्गे, सम्बन्धे—प्रसज्यते।

सद् (षद्लृ) विषादे (आकुलीभावे) उदास होना—सीदति; सत्स्यति। "सीदति राधा वासगृहे।" नि + सद् उपवेशने; नाशे, क्लेशे; क्लान्तौ च।

अव + सद्—श्रान्तौ; विनाशे च। आ + सद्—सन्निकर्षे (निकट आना)। उत् + सद्—नाशे। उत् + सद् + णिच्—उन्मूलने; उत्सादयति उप + सद्–समीपगतौ। नि + सद्–उपवेशने; "उष्णालुः शिशिरे निषी-दति तरोर्मूलालवाले शिखी।" प्र + सद्—अनुग्रहे; प्रसन्नतायाम् (प्रसन्न होना); निर्मलीभावे च (निर्मल होना)। वि + सद्—विषादे; विषीदति।

स्खल्—सञ्चलने (स्खलने, भ्रंशे)—स्खलित होना, खिसकना, फिसलना, रपटना—स्खलति; स्खलिष्यति। स्खलति चरणं भूमौ। स्खलति पत्रं वृक्षस्य।

स्रु क्षरणे—बहना, झरना—स्रवति; स्रोस्यति। नहि निम्बात् स्रवेत् क्षौद्रम् (मधु)।

स्वन् शब्दे—शब्द करना—स्वनति। 'वेणवः कीचकास्ते स्युर्ये स्वनन्त्यनिलोद्धताः।"

ह्रस् अल्पीभावे-घटना-ह्रसति, ह्रसिष्यति। "आयुर्ह्रसति पादशः।" गोमत्याः प्लावनजलं मन्दं मन्दं ह्रसति।

अभ्यास

संस्कृत में अनुवाद करो :—मेरा भाई पुल से गिर पड़ा। राजा दशरथ कैकेयी के उस कठोर वाक्य से मूर्च्छित हुए। इस वर्ष दुर्भिक्ष के कारण हम अतिकष्ट से जीते हैं। सर्वदा साधु के सङ्ग में वास करना चाहिये। इस स्थान में प्रतिदिन लड़के खेलते हैं। तुम्हारे व्यवहार से वे सर्वदा सन्तप्त होते हैं। वहाँ बहुत आम के पेड़ उगे थे। मेरी बात से वे हँसेंगे; परन्तु मेरा चित्त उससे कुछ भी विचलित नहीं होगा। मैं इस गाँव में नहीं बसूँगा। कल ललिता चली गयी। उसका भतीजा ससुराल गया था। मेरी नानी का देहान्त हो गया। बहिन का देवर अभी पढ़ता है। भारत का सिर जवाहरलाल ने संसार के दरबार में ऊँचा किया है। संस्कृत विश्वविद्यालय में गणित की भी शिक्षा होती है। उपदेश देने से मूर्ख खफा होते हैं। लालच बुरी बला है। लोभ सर्वथा त्याज्य है।

भ्वादि सकर्मक आत्मनेपदी धातु ।

लभ् प्रापणे

लट्

	एकवचन	द्विवचन	बहुवचन
प्र० पु०	लभते	लभेते	लभन्ते
म० पु०	लभसे	लभेथे	लभध्वे
उ० पु०	लभे	लभावहे	लभामहे

लोट्

प्र० पु०	लभताम्	लभेताम्	लभन्ताम्
म० पु०	लभस्व	लभेथाम्	लभध्वम्
उ० पु०	लभै	लभावहै	लभामहै

लङ्

प्र० पु०	अलभत	अलभेताम्	अलभन्त
म० पु०	अलभथाः	अलभेथाम्	अलभध्वम्
उ० पु०	अलभे	अलभावहि	अलभामहि

विधिलिङ्

प्र० पु०	लभेत	लभेयाताम्	लभेरन्
म० पु०	लभेथाः	लभेयाथाम्	लभेध्वम्
उ० पु०	लभेय	लभेवहि	लभेमहि

लृट्

प्र० पु०	लप्स्यते	लप्स्येते	लप्स्यन्ते
म० पु०	लप्स्यसे	लप्स्येथे	लप्स्यध्वे
उ० पु०	लप्स्ये	लप्स्यावहे	लप्स्यामहे

आ + लभ्—प्राप्तौ, स्पर्शे, हिंसायाञ्च । उप + आ + लभ्–भर्त्सने । उप + लभ्–प्राप्तौ; अनुभवे; ज्ञाने च । वि + प्र + लभ् + प्रतारणायाम् ।

भ्वादि सकर्मक आत्मनेपदी धातु ।

अय् गतौ जाना, चलना—अयते; अयिष्यते ।

प्र, परा + अय्—पलायने (भागना); प्लायते, पलायते ।

ईक्ष् (१) दर्शने—देखना–ईक्षते, इक्षिष्यते । ईक्षते चन्द्रः लोकः (२) पर्य्यालोचने (सोचना, विचारना) "न कामवृत्तिर्वचनीयमीक्षते" ।

अप + ईक्ष्–अपेक्षायाम् (ठहरना, प्रतीक्षा करना) । अव + ईक्ष = परिदर्शने; आलोचनायाञ्च । उप + ईक्षु—अवज्ञायाम् । निर् + ईक्ष्—निरीक्षणे (देखना) । परि + ईक्ष्—परीक्षायाम् (जाँचना) । प्र + ईक्ष्–दर्शने (दर्शन करना) उत् + प्र + ईक्ष्—उत्प्रेक्षणे, सम्भावने (अनुमान करना) । प्रति + ईक्ष्—प्रतीक्षायाम् (इन्तजार करना) । वि + ईक्ष्–दर्शने । सम् + ईक्ष्—परिदर्शने ।

ऊह वितर्के (अध्याहारे; सम्भावने)—(सन्देहाद् विचारो वितर्क) विचार करना; अनुमान करना–ऊहते; ऊहिष्यते । "ऊहते धर्मधीरः ।" "अनुक्तमप्यूहति पण्डितो जनः" (परस्मैपदी) ।

अप + ऊह—अपनोदने (दूर करना); "हुङ्कारेणैव धनुषः स हि, विघ्नानपोहति ।" (उपसर्ग के योग से विकल्प से आत्पनेनदी होता है ।) वि + अप् + ऊह्—विनाशे; "आदित्यस्तमो व्यपोहति ।" प्रति + ऊह्–विघाते । वि + ऊह्—रचनायाम्, विन्यासे । सम् + ऊह्—समाहारे, एकत्रीकरणे ।

कत्थ् श्लाघाया (आत्मगुणाविष्करणे)—अपनी प्रशंसा करना; गर्व करना (अकर्मक)—कत्थते; कत्थिष्यते । "कत्थते गुणिन गुणी ।" "यः स्वप्नेनापि नात्मीयं गुणं कुत्रापि कत्थते ।" "कृत्वा कत्थिष्यते न कः ?"

वि + कत्थ्—विकत्थने, श्लाघायाम्, निजगुणख्यापने(घमंड करना)

कम् (कमु) वाञ्छायाम्—कामना करना—कामयते। "चेतो न-लङ्कामयते मदीयम्।"

क्षम् (क्षमूष्) सहने (क्षमायाम्; शक्तौ च)—(१) सहना, क्षमा करना; (२) सकना (अकर्मक)—क्षमते; क्षमिष्यते, क्षंस्यते (१) "क्षमस्व परमेश्वर !" "नाज्ञाभङ्गकरान् राजा क्षमेत स्वसुतानपि।" (२) "ऋते रवेः क्षालयितुं क्षमेत कः क्षपातमस्काण्डमलीमसं नभः"

गर्ह् कुत्सायाम्—निन्दा करना—गर्हते; गर्हिष्यते।

वि+गर्ह्—निन्दायाम्।

गाह् (गाहू) विलोडने (प्रवेशे; प्राप्तौ च)—(१) हिलोरना, आलोडन करना;(२) घुसना, (३) प्राप्त होना—गाहते;गाहिष्यते, घाक्ष्यते। (१)"गाहन्तां महिषा निपानसलिलम्।" (२) "कदाचित् काननं जगाहे।" (३) "मनस्तु मे संशयमेव गाहते।"

अव+गाह्—निमज्जने, स्नाने; प्रवेशे च;"प्रातरवगाहते मुनिः।" "तमोऽपहन्त्रीं तमसां वगाह्य।" वि+गाह्—निमज्जने; प्रवेशे, विलोडने च।

ग्रस् (ग्रसु) (१) भक्षणे—खाना—ग्रसते; ग्रसिष्यते। "यावतो ग्रसते ग्रासान्।" (२) आक्रमणे; "हिमांशुमाशु ग्रसते तन्म्रदिम्नः स्फुटं फलम्।"

ढौक् (ढौकृ) गतौ—जाना; "यान्तं वने रात्रिचरी डुढौके।"

ढौक्+णिच् प्रापणे (ले जाना); "तन्मांसञ्चैव गोमायोस्तैः क्षणादाशु ढौकितम्।" उप+ढौक्—उपढौकने, उपहारे (भेंट देना, उपहार देना); "एकैकं पशुमुपढौकयामः।"

त्रै* (त्रैङ्) पालने (रक्षणे)—त्राण करना—त्रायते; त्रास्यते। "क्षतात् किल त्रायत इत्युदग्रः क्षत्रस्य शब्दो भुवनेषु रूढः।"

परि+त्रै—परित्राणे (रक्षणे)।

---

* शिष्ट प्रयोग में अदादिगणीय 'त्रा'—धातु भी है; यथा—"त्राहि मां मधुसूदन॥"

दय् अनुकम्पायाम्—दया करना—दयते; दयिष्यते। "दयते दीनं दयालु।" "तेषां दयसे न कस्मात् ?"।

नाथ् (नाथृ) याचने—माँगना, प्रार्थना करना—नाथते; नाथिष्यते। "मोक्षाय नाथते मुनिः।" "नाथसे किमु पतिं न भूभृतः ?"

पण् व्यवहारे (क्रयविक्रयरूपे वाणिज्ये) खरीद-बिक्री करना—पणते; पणिष्यते।—द्यूतक्रीडायां ग्लहस्थापने (बाजी लगाना); जिस वस्तु का पण रक्खा जाता है; उसमें षष्ठी और कहीं द्वितीया भी होती है। "प्राणानामपणिष्टासौ।" "पणस्व कृष्णां पाञ्चालीम्।"

वि+पण्—विक्रये; "आभीरदेशे किल चन्द्रकान्तं त्रिभिर्वराटैर्विपणन्ति गोपाः।"

बाध् (बाधृ) पीडने; प्रतिबन्धे च—(१) दुःख देना; (२) रोकना—बाधते; बाधिष्यते। (१) "मां बाधते न हि तथा विपिनेषु वासः।" "न तथा बाधते स्कन्धो यथा 'बाधति' बाधते।" (२) "वीराणां समयः स्नेहक्रमं बाधते।"

आ+बाध्—दमने। प्र+बाध्—परपीडने।

भाष् कथने—भाषण करना—भाषते; भाषिष्यते। द्विकर्मक—"तं वाक्यमिदं बभाषे।"

अप्+भाष्—निन्दायाम्; "न केवलं यो महतोऽपभाषते, शृणोति तस्मादपि यः स पापभाक्।" आ+भाष्—आलापे, कथने। प्रति+भाष् प्रत्युक्तौ। सम्+भाष्—सम्भाषणे।

भिक्ष् याचने—माँगना—भिक्षते; भिक्षिष्यते। द्विकर्मक—भिक्षते दातारं धनं भिक्षुः।

रभ्—आ+रभ्—आरम्भे—आरभते, आरप्स्यते। विज्ञानं पठितुम् आरभते पुत्रः।

परि+रभ्—आलिंगने। सम्+रभ्—कोपे।

लोक् (लोकृ) दर्शने—देखना—लोकते, लोकिष्यते। "न लोकते कामार्तः सूर्यालोके मध्यवर्तिनमपि पुरुषम्।"

अव+लोक्, आ+लोक्, वि+लोक—दर्शने।

वन्द् (वदि) अभिवादने; स्तुतौ च—नमस्कार करना; स्तव करना—वन्दते; वन्दिष्यते। "वन्दते गुरुं लोकः।" "तं वन्दे परमानन्दमाधवम्।" "वन्दे मातरम्।"

वेष्ट् वेष्टने—घेरना; लपेटना—वेष्टते। इसी अर्थ में णिजन्त भी होता है; वेष्टयति। "ग्रीवायां वेष्टयित्वैनं स गजो हन्तुमैहत्।" "करवेष्टं भीमसेनो भ्रमं दत्त्वा व्यमोचयत्।"

णिजन्त आ+वेष्ट् और परि+वेष्ट् भी एतदर्थक हैं। सम्+वेष्ट्+णिच्—तह करना; "संवेष्टित-प्रसारितपटन्यायेनैवानन्यत् कारणात् कार्य्यम्।"

शङ्क् (शकि) संशये; त्रासे च—(१) शङ्का करना, सन्देह करना; (२) डरना (अकर्मक)—शङ्कते; शङ्किष्यते। (१) "शङ्कते पुरुषत्वं स्थाणौ" (स्थाणुर्वा पुरुषो वा इति संशयमारोपयतीत्यर्थः)। (२) "शङ्कते व्याघ्राज्जनः।"

आ+शङ्क्—सन्देहे, शङ्कायाम् च (स्नेहः सदापापमाशङ्कते)।

शंस् (शसि) इच्छायाम्; आशिषि (इष्टार्थशंसने) च—(१) चाहना, (२) आशीर्वाद देना—नित्यम् 'आङ्'—योगः—आ+शंस्—आशंसते; आशंसिष्यते। (१) "मनोरथाय नाशंसे।" (२) "इत्याशशंसे करणैरबाह्यैः।"

शिक्ष् विद्याग्रहणे (शिक्षणे)—सीखना—शिक्षते; शिक्षिष्यते। "अशिक्षतास्त्रं पितुरेव मन्त्रवित्।"

श्लाघ् (श्लाघृ) कत्थने (प्रशंसायाम्)—सराहना—श्लाघते; श्लाघिष्यते। "श्लाघते गुणिनं गुणी।"

"गुणदोषौ बुधो गृह्णन्, इन्दु-क्ष्वेडाविवेश्वरः। शिरसा श्लाघते पूर्वं, परं कण्ठे नियच्छति।"

सह् (षह्) सहने; क्षमायाञ्च—(१) सहना; (२) क्षमा करना—सहते, सहिष्यते। (१) "सहते दुःखं धीरः।" "न मानिनी सहतेऽन्यसङ्गमम्।" (२) "अपराधमिमं ततः सहिष्ये।" (३) शक्तौ (सकना); "सहतां च शास्त्रगम्य उपायः तत् (दुःखत्रयम्) उच्छेत्तुम्।"

उत्+सह—उत्साहे; सामर्थ्ये (सकना); "तवानुवृत्तिं न च कर्त्तुमुत्सहे।"

सेव् आराधने; उपभोगे, आश्रये च—सेवा करना-सेवते; सेविष्यते। शिवं सेवते, सर्वः सुखं सेवते, तीर्थं सेवते ब्राह्मणः।

आ+सेव्—उपभोगे। नि+सेव्—आश्रये; उपभोगे च; निषेवते। "धार्मिको हि निषेवते सुखम्।"

स्वञ्ज् (ष्वन्ज्) आलिङ्गने—गले लगाना, स्वजते, स्वङ्क्ष्यते। स्वजते तनयं माता।

परि+स्वञ्ज्—आलिंगने; परिष्वजते।

स्वद् (ष्वद्) आस्वादने (अनुभवे); रुचौ च—(१) चखना (२) रुचना (अकर्मक)—स्वदते, स्वदिष्यते। (१) "स्वदस्व हव्यानि।" "स्वदते विविधं स्वादु।" (२) "अपां हि तृप्ताय न वारिधारा स्वादुः सुगन्धि स्वदते तुषारा।"

अभ्यास

संस्कृत में अनुवाद करो :—बालक क्षीर चख कर खाता है। कभी सत्कार्य में बाधा मत डालो। सर्वान्तःकरण से गुरुजनों की (द्वितीया) सेवा करूँगा। अपव्यवहार से उनको पीड़ा देना उचित नहीं है। जो दुःखी पर दया करता है, ईश्वर उसका सहायक होता है। सद्विषय बालक के पास भी सीखना उचित है। शिक्षक सर्वदा हमारा मंगल चाहते हैं। आज तुम्हारी परीक्षा करूँगा। दीन का (द्वितीया) त्राण करो, नहीं तो ईश्वर तुम्हारा (द्वितीया) त्राण नहीं करेंगे। साधुपुरुष जब जिस कार्य का (द्वितीया) आरम्भ करते हैं, प्राणान्त में भी (प्राणात्ययेऽपि) उसे नहीं छोड़ते। मैं तेरे शत अपराध क्षमा करूँगा। पिता पुत्र का (द्वितीया) आलिंगन करता है। राम मेरी (द्वितीया) प्रतीक्षा कर रहा है। किसी से याचना करना उचित नहीं है। मेरा उपदेश तुम सब बालकों से कह दो। बन्दरों को देखो। भारत-माता को नमस्कार करो। माँ ने कपड़े से शिशु को आवृत कर लिया। घड़ियाल ने बकरी को निगल लिया। दरिद्रों पर दया करो।

—:०:—

भ्वादि अकर्मक आत्मनेपदी धातु

ईह् वाञ्छायाम्; चेष्टने च—(१) इच्छा करना; सकर्मक; (२) यत्न करना, कोशिश करना—ईहते; ईहिष्यते। (१) "ईहन्ते कामभोगार्थमन्यायेनार्थसञ्चयान्" (२) "माधुर्य्यं मधुविन्दुना रचयितुं क्षाराम्बुधेरीहते"।

सम्+ईह—"सर्वः स्वार्थं समीहते"।

एध् वृद्धौ—बढ़ना—एधते; एधिष्यते। "हिंसारतश्च यो नित्यं नेहासौ सुखमेधते।"

"अधर्मेणैधते तावत् ततो भद्राणि पश्यति।

ततः सपत्नाञ् जयति, समूलस्तु विनश्यति।"

कण्ठ् (कठि) शोके (उत्कण्ठायाम्, औत्सुक्ये च)—शोक इव आध्यानम् (उत्कण्ठापूर्वस्मरणम्)—उत्कण्ठित होना, उत्सुक होना—'उत्' उपसर्ग के साथ प्रयुक्त होता है—उत्कण्ठते; उत्कण्ठिष्यते। "स्वर्गाय नोत्कण्ठते।" "उत्कण्ठते च युष्मत्सन्निकर्षस्य।" "रेवारोधसि वेतसीतरुतले चेतः समुत्कण्ठते।"

कम्प् (कपि) चलने (कम्पने)—काँपना—कम्पते, कम्पिष्यते। कम्पते वायुना वृक्षः।

अनु+कम्प्+कृपायाम्। सम्+अनु+कम्प्—अनुग्रहे। उत्, प्र, वि+कम्प्—प्रकम्पने।

काश् (काशृ) दीप्तौ (प्रकाशे)—चमकना—काशते; काशिष्यते। "काशते चन्द्रः।"

प्र+काश्—प्रकाशे। प्र+काश्+णिच्–प्रकाशने (उजाला करना); प्रकाशयति; "प्रकाशयति लोकं रविः।"

वि+काश्—विकाशे।

क्लृप् (कृप्) सामर्थ्ये, योग्यतायाञ्च—(१) समर्थ होना (२) योग्य होना—कल्पते, कल्पिष्यते, कल्प्स्यते। (१) "सूर्ये तपत्यावर-

णाय दृष्टेः कल्पेत लोकस्य कथं तमिस्रा ?"(२) "प्रतिकारविधानमायुषः सति शेषे हि फलाय कल्पते।"

अव + क्लृप्—औचित्ये। उप + क्लृप्—विन्यासे; सम्पन्नतायाञ्च।

वि + क्लृप्—संशये, विकल्पने च।

गल्भ् धाष्टर्ये (प्रगल्भतायाम्, औद्धत्ये, साहसे च)—उद्धत होना, साहसी होना—गल्भते। प्रायः 'प्र' उपसर्ग के साथ प्रयुक्त होता है; "न मौक्तिकच्छिद्रकरी शलाका प्रगल्भते कर्मणि टङ्किकायाः।" "अति हि नाम प्रगल्भते।"—सामर्थ्ये ('सकना' इस अर्थ में) 'तुमुनन्त'—पद के साथ व्यवहृत होता है।

घट् चेष्टायाम् (यत्ने); आपतने, निष्पत्तौ; योग्यतायाञ्च—(१) व्यापृत होना; (२) आ पड़ना, सिद्ध होना; (३) सम्भव होना; योग्य होना—घटते घटिष्यते। (१) "घटते पठितुं शिष्यः।" (२) "कृत्यं घटेत सुहृदो यदि।" (३) "तथाऽपि पुंविशेषत्वाद् घटतेऽस्य नियन्तृता।"

घट् + णिच्—संयोजने, सम्पादने; करणे; नियोगे च; घटयति।

वि + घट्—विश्लेषे, भेदे।

घूर्ण् + भ्रमणे (घूर्णने)—घूमना—घूर्णते; घूर्णिष्यते। तुदादि परस्मैपदी भी होता है—वोपदेवमते उभयपदा। "नौर्घूर्णते चपलेव स्त्री।" "घूर्णते शिरः।" "घूर्णतीव मे मनः।"

आ + घूर्ण्—चक्रवद् भ्रमणे।

चेष्ट् यत्ने; व्यापारे च—(१) यत्न करना; (२) काम में लगे रहना—चेष्टते; चेष्टिष्यते। (१) "चेष्टते पठितुं शिष्यः।" "वृत्त्यर्थं नातिचेष्टेत।" (२) "सदृशं चेष्टते स्वस्याः प्रकृतेर्ज्ञानवानपि।" "तं शोणितपरीताङ्गं चेष्टमानं महीतले।" इत्यत्र तु लुठनार्थः (लोटना)।

वि + चेष्ट्—लुठने, परिस्पन्दने, अङ्गपरिवर्त्तने च।

च्यु (च्युङ्) पतने (च्युतौ, भ्रंशे, शरणे च)—खिसकना, गिरना, च्युत होना—च्यवते;च्यविष्यते। "धर्म्मान्न च्यवेत।" नाशे; "उत्पद्यन्ते च्यवन्ते"।

प्र + च्यु—भ्रंशे; स्रावे च।

जृम्भ् (जृभि) जम्भणे (मुखविकासे, पुष्पादीनां विकासे च)-(१) जम्हाना (२) खिलना—जृम्भते; जृम्भिष्यते। (१) "जृम्भस्व सिंह ! दन्तांस्ते गणयिष्ये।" (२) "पङ्कजं जृम्भतेऽद्य।" (३) वृद्धौ (बढ़ना); "जृम्भतां जृम्भतामप्रतिप्रसरं क्रोधज्योतिः।"

उत्+जृम्भ्—उदये; विकासे; वृद्धौ च। वि+जृम्भ्+जृम्भणे; व्याप्तौ च।

डी (डीङ्) नभोगतौ (उड्डयने)—उड़ना—डयते; डयिष्यते। डयते पक्षी।

उत्+डी—उड्डयने।

त्रप् (त्रपूष्) लज्जायाम्—लज्जित होना, शर्मिन्दा होना—त्रपते; त्रपिष्यते; त्रप्स्यते। "त्रपन्ते तीर्थानि त्वरितमिह तस्योद्धृतिविधौ।"

अप+त्रप्-लज्जायाम्' "य आत्मनाऽपत्रपते भृशं नरः स सर्वलोकस्य गुरुर्भवत्युत।" "येनापत्रपते साधुरसाधुस्तेन तुष्यति।"

त्वर (ञित्वरा) वेगे-शीघ्रता करना, जल्दी करना-त्वरते; त्वरिष्यते। "भवान् सुहृदर्थं त्वरताम्।" "त्वरन्ते हि विद्यार्थिनः परीक्षालयं गन्तुम्।"

त्वर्+णिच्—त्वरयति; "दूतास्त्वरयन्ति माम्।"

द्युत् दीप्तौ (प्रकाशे)—चमकना—द्योतते; द्योतिष्यते। "मध्याह्नसमये द्योतते रविः।"

उत्+द्युत्—औज्ज्वल्ये। वि+द्युत्—शोभायाम्।

ध्वंस् (ध्वसु) नाशे; भ्रंशे अधःपतने च—(१) नष्ट होना; (२) स्खलित होना—ध्वंसते; ध्वंसिष्यते। (१) "तमांसि ध्वंसन्ते।" (३) "ध्वंसेत हृदयं सद्यः।"

अप+ध्वंस्—निन्दायाम्, तिरस्कारे; "नि चाप्यन्यमपध्वंसेत् कदाचित् कोपसंयुतः।" वि+ध्वंस्—निपाते, क्षये।

प्याय् (ओप्यायी)—प्यै (प्यैङ्) वृद्धौ (स्फीतौ)—बढ़ना, फूलना—प्यायते; प्यायिष्यते। प्यायते उदरं तव।

जृम्भ् (जृभि) जम्भणे (मुखविकासे, पुष्पादीनां विकासे च)–(१) जम्हाना (२) खिलना—जृम्भते; जृम्भिष्यते। (१) "जृम्भस्व सिंह ! दन्तांस्ते गणयिष्ये।" (२) "पङ्कजं जृम्भतेऽद्य।" (३) वृद्धौ (बढ़ना); "जृम्भतां जृम्भतामप्रतिप्रसरं क्रोधज्योतिः।"

उत्+जृम्भ्—उदये; विकासे; वृद्धौ च। वि+जृम्भ्+जृम्भणे; व्याप्तौ च।

डी (डीङ्) नभोगतौ (उड्डयने)—उड़ना—डयते; डयिष्यते। डयते पक्षी।

उत्+डी—उड्डयने।

त्रप् (त्रपूष्) लज्जायाम्—लज्जित होना, शर्मिन्दा होना—त्रपते; त्रपिष्यते; त्रप्स्यते। "त्रपन्ते तीर्थानि त्वरितमिह तस्योद्धृतिविधौ।"

अप+त्रप्-लज्जायाम्' "य आत्मनाऽपत्रपते भृशं नरः स सर्वलोकस्य गुरुर्भवत्युत।" "येनापत्रपते साधुरसाधुस्तेन तुष्यति।"

त्वर (ञित्वरा) वेगे–शीघ्रता करना, जल्दी करना–त्वरते; त्वरिष्यते। "भवान् सुहृदर्थं त्वरताम्।" "त्वरन्ते हि विद्यार्थिनः परीक्षालयं गन्तुम्।"

त्वर्+णिच्—त्वरयति; "दूतास्त्वरयन्ति माम्।"

द्युत् दीप्तौ (प्रकाशे)—चमकना—द्योतते; द्योतिष्यते। "मध्याह्नसमये द्योतते रविः।"

उत्+द्युत्—औज्ज्वल्ये। वि+द्युत्—शोभायाम्।

ध्वंस् (ध्वसु) नाशे; भ्रंशे अधःपतने च—(१) नष्ट होना; (२) स्खलित होना—ध्वंसते; ध्वंसिष्यते। (१) "तमांसि ध्वंसन्ते।" (३) "ध्वंसेत हृदयं सद्यः।"

अप+ध्वंस्—निन्दायाम्, तिरस्कारे; "नि चाप्यन्यमपध्वंसेत् कदाचित् कोपसंयुतः।" वि+ध्वंस्—निपाते, क्षये।

प्याय् (ओप्यायी)—प्यै (प्यैङ्) वृद्धौ (स्फीतौ)—बढ़ना, फूलना—प्यायते; प्यायिष्यते। प्यायते उदरं तव।

आ+प्याय, प्यै—स्फीतौ; प्रीतौ च। आ+प्याय्, प्यै+णिच्—वर्द्धने; प्रीणने च; आप्याययति। "आप्याययति अतिथिं गृहस्थः।"

प्रथ् विख्यातौ—प्रसिद्ध होना—प्रथते; प्रथिष्यते। "सर्वत्र प्रथते गुणी।" (२) विस्तारे (फैलना); "तथा यशोऽस्य प्रथते।"

प्लु+(प्लुञ्) गतौ (लम्फे); सन्तरणे; उत्तरणे च—(१) कूदना; (२) बहना, तैरना; (३) पार होना (सकर्मक)—प्लवते; प्लोष्यते। (१) "मृगः पुप्लुवे।" (२) "किं नामैतत्,अम्बुनि मज्जन्त्यलाबूनि, ग्रावाणः प्लवन्त इति" (३) "पुप्लुवे सागरं नौकया।"

प्लु+णिच्—प्लावने (डुबाना); प्लावयति। आ+प्लु–अवगाहने, स्नाने "सवासा जलमाप्लुत्य।" उत्+प्लु—उल्लम्फे (फाँदना) उप+प्लु—उत्पीडने। परि+प्लु—चलने; चाञ्चल्ये। वि+प्लु—विपत्तौ, विनाशे च। सम्+प्लु—वृद्धौ।

भास् (भासृ) दीप्तौ (स्फुरणे, स्फुटीभावे, अविर्भावे च)—(१) चमकना; (२) प्रकट होना—भासते; भासिष्यते। (१) "तावत् कामनृपातपत्रसुषमं बिम्बं बभासे विधोः।" (२) "त्वदङ्गमार्दवे दृष्टे चित्ते न भासते। मालतीशशभृल्लेखाकदलीनां कठोरता।" 'अव' और 'प्रति' उपसर्ग के साथ भी यह प्रयुक्त होता है।

भ्रंश् (भ्रन्शु) अधःपतने—भ्रष्ट होना—भ्रंशते, भ्रंशिष्यते। "भ्रंशते दुरितं राष्ट्रे प्रजाभ्यो यत्प्रभावतः।"

परि, प्र+भ्रंश्—च्युतौ, पतने च।

भ्राज् (भ्राजृ, टुभ्राजृ) दीप्तौ (शोभायाम्)—चमकना—भ्राजते; भ्राजिष्यते। "विभ्राजसे मकरकेतनमर्चयन्ती।"

मुद् हर्षे—आनन्दित होना, मोदते; मोदिष्यते। "मोदते परमं धार्मिकः।"

अनु+मुद्—अनुमोदने (पसन्द करना)। प्र+मुद्—हर्षे।

यत् (यती) यत्ने—प्रयत्न करना—यतते; यतिष्यते। "यतते पठितुं विप्रः।"

आ + यत्—वशीभावे (आयत्त होना, अधीन होना निर्भय रहना); सप्तमी के साथ; "वयं त्वय्यायतामहे ।" प्र + यत्—प्रयत्ने ।

रम् (रमु) क्रीडायाम् (रमणे, आनन्दे; आसक्तौ)—खेलना; (२) आनन्दि होना—रमते; रंस्यते । (१) "रेमे मुहुर्मध्यगता सखीनाम् ।" (२) "लोलापाङ्गैर्यदि न रमसे लोचनैर्वञ्चितोऽसि ।"

अभि + आ + रम्–आसक्तौ; आरमति । उप + रम्—निवृत्तौ; मरणे च—उपरमति-ते । वि + रम्—निवृत्तौ; विरमति ।

रुच् प्रीतौ; प्रकाशे च—(१) रुचना; (२) चमकना; शोभित होना–रोचते, रोचिष्यते । रोचिरिह अनुरागविशेषः । तत्र यस्यानुरागः, तस्य सम्प्रदानत्वम् । (१) रोचतेऽन्नं बुभुक्षवे, "यदेव रोचते यस्मै भवेत् तत् तस्य सुन्दरम् ।" (१) "रुरुचिरे रुचिरेक्षणविभ्रमाः ।"

वि + रुच्—दीप्तौ, प्रकाशे च ।

लम्ब् (लबि) अवस्रंसने (लम्बने) लटकना—लम्बते, लम्बिष्यते । "ऋषयो ह्यत्र लम्बन्ते ।"

अव + लम्ब—आश्रये । आ + लम्ब्—आश्रये, आदाने च । वि + लम्ब—विलम्बे । "बिलम्बते खलु अलसो जनः ।"

वल् चलने—जाना, चलना—वलते, वलिष्यते । "अलिकदम्बकं वलतेऽभिमुखं तव ।" "हृदयमध्ये तस्मिन्नेवं पुनर्वलते बलात् ।" "त्वदभिसरणरभसेन वलन्तो ।" "दृष्टिरन्यो न वलति ।"—इत्यादौ परस्मैपदमपि ।

वृत् (वृतु) वर्त्तने (स्थितौ, विद्यमानतायाम्)—रहना—वर्त्तते, वर्त्तिष्यते, वर्त्स्यति । "अत्र विषयेऽस्माकं महत् कुतूहलं वर्त्तते ।" "किं वर्त्ततेऽस्मिन् ?"

वृत् + णिच्—आजीविकायाम्, वृत्तिकरणे, प्राणधारणे (गुजारा या जीवन निर्वाह करना) वर्त्तयति । "रामोऽपि सह वैदेह्या वने वन्येन वर्त्तयन् ।" क्वचित् आत्मनेपदमपि, यथा—"मदसिक्तमुखैर्मृगाधिपः करिभिर्वर्त्तयते स्वयं हतैः ।"

अति+वृत्—अतिक्रमे, उल्लङ्घने (सकर्मक)। अनु+वृत्—अनुसरणे (सकर्मक)। अप—वृत्—प्रतिनिवृत्तौ (लौटना)। वि+अप वृत्—निवृत्तौ। अभि+वृत्—अभिमुखगमने, आगमने (सकर्मक)। आ+वृत्—आगमने। आ+वृत्+णिच्—दुग्धादिपाके (औटाना, खौलाना); आवृत्तौ (फेरना) च; आवर्त्तयति। अप+आ+वृत्; उप+आ+वृत्, परा+वृत्, वि+आ+वृत्—निवृत्तौ (लौटना)। नि+वृत्—निवृत्तौ। निर्+वृत्—निष्पत्तौ, समाप्तौ। प्र+वृत्—प्रवृत्तौ। वि+वृत्—घूर्णने, भ्रमणे। सम्+वृत्—सत्तायाम् (होना); "स्विन्नाङ्गुलिः संववृते कुमारी।

वृध् (वृधु) वृद्धौ—बढ़ना—वर्द्धते, वर्द्धिष्यते, वर्त्स्यति। "वर्द्धते ते तपः।" "अङ्कुरः क्रमशः वर्द्धते।"

सम्+वृध्+णिच्—वर्द्धने, प्रतिपालने, सम्मानने च;—संवर्द्धयति। "कोकिलशावकं संवर्द्धयति काकः।"

वेप् (टुवेपृ) कम्पने—काँपना—वेपते; वेपिष्यते। "वेपते वायुना-वृक्षः" "वेपते हृदयं मम।"

व्यथ् भये, चलने; दुःखानुभवे च—डरना; विचलित होना, दुःख पाना—व्यथते; व्यथिष्यते। व्यथते लोकः (दुःखमनुभवति, कम्पते, बिभेति वा)।

शुभ् दीप्तौ (शोभायाम्)—शोभित होना—शोभते; शोभिष्यते। "सुष्ठु शोभसे एतेन विनयमाहात्म्येन।" "सुखं हि दुःखान्यनुभूय शोभते।"

श्वित् (श्विता) शौक्ल्ये-सफेद होना-श्वेतते। "श्वेतते प्रासादः।" "व्यतिकरितदिगन्ताः श्वेतमानैर्यशोभिः।"

स्पन्द् (स्पदि) किञ्चिच्चलने (ईषत्कम्पने; स्फुरणे)—काँपना, फड़फड़ाना।—स्पन्दते; स्पन्दिष्यते। "स्पन्दते दक्षिणो भुजः।" "पस्पन्दे वामनयनं जानकीजामदग्न्ययोः।"

'परि' उपसर्गके साथ भी प्रयुक्त होता है।

स्पर्ध् संघर्षे (पराभिभवेच्छायाम्)—स्पर्द्धा करना, बराबरी करना झगड़ना—स्पर्द्धते; स्पर्द्धिष्यते। स्पर्द्धते बलिना समं बली।

स्मि (ष्मिङ्) ईषद्धसने—मुस्कराना—स्मयते; स्मेष्यते। स्मयते वधूः। "स्मयमानं वदनाम्बुजं स्मरामि।"

वि+स्मि—विस्मये (विस्मित होना)।

स्यन्द् (स्यन्दू) स्रवणे (क्षरणे)—चूना, बहना—स्यन्दते; स्यन्दिष्यते। "अरविन्दात् मकरन्दः स्यन्दते।"

अभि+स्यन्द्—द्रवीभावे, क्षरणे;। "अभिष्यन्दते हृदयम्।"
स्रंस् (स्रंसु) भ्रंशे (अधःपतने)—च्युत होना—स्रंसते; स्रंसिष्यते, "गाण्डीवं स्रंसते हस्तात्।"

ह्लाद् (ह्लादी) हर्षे—हृष्ट होना—ह्लादते, ह्लादिष्यते। "आविज्ञातेऽपि बन्धौ हि बलात् प्रह्लादते मनः।" "धन्यानां विरजस्तमा भगवतीं चर्येयमाह्लादते"।

अभ्यास

संस्कृत में अनुवाद करो—शिशु बढ़ रहा है। वधू धीरे-धीरे चलती है। यहाँ तीन लड़के हैं। तुम्हारी उन्नति से मेरा मत हृष्ट होता है। व्याघ्र का गर्जन सुनकर (श्रुत्वा) सभी का हृदय काँप उठता है। दरिद्र शिशुओं के उपकार के लिए सर्वदा यत्न करूँगा। पूर्व दिशा में चन्द्रमा शोभा पाता है—यह देखकर (दृष्ट्वा) कौन आनन्दित नहीं होता? राम के कुव्यवहार से श्याम नितान्त लज्जित हुआ है। काय मनो वाक्य से प्रयत्न करो। मोहन मुस्कराता है। हिन्दी-लेखक स्पर्द्धा करते हैं। हाथ से क्या गिरा? धन पाकर ब्राह्मण हृष्ट नहीं होते।

भ्वादि सकर्मक उभयपदी धातु

भ्वादि उभयपदी धातु परस्मैपद में 'पत्'-धातु और आत्मनेपद में 'लभ्'—धातु के तुल्य हैं।

खन् (खनु) अवदारणे (खनने)—खोदना—खनति, खनते; खनिष्यति, खनिष्यते। "तृषितो जाह्नवीतीरे कूपं खनति दुर्मतिः।"

उत्+खन्—खनने; उत्पाटने, उन्मूलने च। नि+खन्—रोपणे, स्थापने, प्रवेशने (गाड़ना); । "ऊनद्विवर्षं निखनेत्।"

गुह् (गुहू) संवरणे (आच्छादने,)—ढाँकना, छिपाना—गूहति, गूहते; गूहिष्यते घोक्ष्यते। "गुह्यञ्च गूहति गुणान् प्रकटीकरोति।"

उप+गुह्—आलिङ्गने। नि+गुह्—गोपने।

चाय् (चायृ) दर्शने (चाक्षुषज्ञाने)—देखना—चायति, चायते; चायिष्यति, चायिष्यते। "तं पर्वतीयाः प्रमदाश्चचायिरे।"

नि+चाय—दर्शने।

धाव् (धावु) शुद्धौ (क्षालने); द्रुतगमने च—(१) धोना; (२) दौड़ना (अकर्मक)—धावति, धावते; धाविष्यति, धाविष्यते (१) "दधावाद्भिस्ततश्चक्षुः सुग्रीवस्य विभीषणः।" (२) "धावन्त्यमी मृगजवाक्षमयेव रथ्याः।"

अनु+धाव्—पश्चाद्धावने; अनुसन्धाने च। अभि+धाव्—अभिमुखगतौ। निर्+धाव्—मार्जने।

धृ (धृञ्) धारणे—पकड़ना—धरति, धरते; धरिष्यति, धरिष्यते।

अव+धृ+णिच्, अथवा चुरादि—निश्चये, निरूपणे; अवधारयति। उत्+धृ—उद्धारे, मोचने।

नी (णीञ्) (१) प्रापणे (नयने)—ले जाना—नयति, नयते, नेष्यति, नेष्यते। "नयति जलभारं मेघः।"

द्विकर्मक—"नयति नयते गां वनं गोपः" (प्रापयतीत्यर्थः)। "मामपि तत्र नय।"—(२) अतिवाहने; "संविष्टः कुशशयने निशां निनाय।"

अनु+नी—प्रार्थनायाम्; प्रसादने च। अप+नी—अपसारणे। अभि+नी—अभिनये, अनुकरणे। आ+नी—आनयने। आ—नी+णिच्—माँगना; आनाययति। प्रति+आ+नी—प्रत्यानयने। उत्+नी–उत्क्षेपणे; अनुमाने च। उप+नी–(१) उपनयने "माणवकम् उपनयते"; (२) प्रापण च, "आर्यस्यासनमुपनय।" निर्+नी—अवधारणे। परि+ नी—विवाहे। प्र+नी—रचनायाम्; प्रापणे च। वि+नी—अपनयने; शासने, शिक्षायाञ्च।

पच् (डुपचष्) (१) पाके (रन्धने)—पकाना—पचति, पचते; पक्ष्यति; पक्ष्यते। द्विकर्मक—"पचति पचते तण्डुलान् ओदनं लोकः।" (२) जीर्णीकरणे (परिपाक करना; हजम करना); "पचाम्यन्नं चतुर्विधम्।"

कर्मकर्त्तरि—(१) परिणामे, परिणतावस्थायाम्—पच्यते; "सद्य एव सुकृतां हि पच्यते कल्पवृक्षफलधर्मि काङ्क्षितम्।" (२) विनाशोन्मुखीभावे; "नरके पच्यते घोरे।" "ते पच्यन्ते नरके निगूढाः।"

भज् भागे; सेवायाम् (अनुरागे; आश्रये स्वीकारे; प्राप्तौ) च—(१) बाँटना; (२) सेवा करना, भक्ति करना; (३) आश्रय करना; (४) प्राप्त होना—भजति, भजते; भक्ष्यति, भक्ष्यते। (१) "भ्रातरः समं भजेरन् पैतृकं रिक्थम्।" (२) "हरिं भज।" "भज गोविन्दम्।" (३) "शिलातलं भेजे।" "मातर्लक्ष्मि! भजस्व कञ्चिदपरम्।" (४) "अभितप्तमयोऽपि मार्दवं भजते, कैव कथा शरीरिषु।"

वि+भज्—विभागे (हिस्सा करना)।

भृ (भृञ्) भरणे (पूरणे; पोषणे, प्रतिपालने)—(१) भरना; (२) पालना—भरति, भरते; भरिष्यति, भरिष्यते। (१) "भरति कुम्भमद्भिर्जनेः।" (२) "दरिद्रान् भर कौन्तेय! मा प्रयच्छेश्वरे धनम्।"

यज् देवपूजायाम् (यागे); दाने च— (१) पूजा वा याग करना; (२) देवता के उद्देश में उत्सर्ग करना—यजति, यजते, यक्ष्यति, यक्ष्यते। (१) "यजति-यजते विष्णुं सुधीः।" (पूजयतीत्यर्थः)। यागार्थ में तृतीयान्त यज्ञवाचक शब्द के साथ प्रयुक्त होता है। यथा— "यजेत राजा क्रतुभिः।" "अश्वमेधेन यजते।" (२) उत्सर्गार्थ में द्वितीयान्त देवतावाचक और तृतीयान्त उत्सृष्ट वस्तुवाचक शब्द के साथ प्रयुक्त होता है। "पशुना रुद्रं यजते" (पशुं रुद्राय ददातीत्यर्थः)। "यस्तिलैर्यजते पितॄन्"।

याच् (टुयाचृ) याचने (प्रार्थनायाम्)—याच्ञा करना, माँगना—याचति, याचते; याचिष्यति, याचिष्यते। द्विकर्मक—"बलिं याचते वसुधाम्।" "याचति याचते नृपं विप्रः।" "पितरं प्रणिपत्य पादयोरपरित्यागमयाचतात्मनः।"

लष् स्पृहायाम्—इच्छा करना, अभिलाषा करना—लशति, लषते; लष्यति, लष्यते, लषिष्यति; लषिष्यते। प्रायः यह 'अभि' पूर्वक प्रयुक्त होता है—अभिलषति, अभिलष्यति। "तेन दत्तमभिलेषुरङ्गना-मुखासवम्।" "मानुषानभिलष्यन्ती।"

वप् (डुवप्) बीजवपने; तन्तुवपने; मुण्डने च—(१) बीज बोना; (२) बुनना; (३) मूँडना;—वपति, वपते; वप्स्यति, वप्स्यते। (१) "यादृशं वपते बीजं तादृशं लभते फलम्।" (२) "वपति तन्तुं तन्तुवायः।" (३) "वपति मस्तकं नापितः।"

नि+वप्, निर+वप्+उत्सर्गे; दाने। प्रति+वप्—अनुवेधे—(जड़ना); निखनने, विन्यासे च।

वह् प्रापणे; धारणे च—(१) ले जाना; (२) धारण करना;—वहति, वहते; वक्ष्यति वक्ष्यते। (१) द्विकर्मक–वहति वहते भारं ग्रामं जनः (प्रापयतीत्यर्थः); (२) "न गर्दभा वाजिधुरं वहन्ति।"—(३) वायोर्गतो (अकर्मक); "मन्दं वहति मारुतः।"–(४) स्पन्दने, स्रवणे, क्षरणे (अकर्मक), "परोपकाराय वहन्ति नद्यः।"

अति + वह् + णिच्—अतिवाहने, यापने, अतिक्रमणे; अतिवाहयति। अप + वह्—उत्सारणे; निरासे च; "अपोवाह वासोऽस्या मारुतः।" अप + वह् + णिच्—अपसारणे; अपवाहयति। आ + वह्—उत्पादने; धारणे च। उत् + वह—विवाहे; धारणे च। निर् वह—निष्पत्तौ; सम्पादने; स्थितौ च—"सर्वथा सत्यवचने देहो न निर्वहेत्" भागवत-टीका; "कारणमसदिति कथयन् बन्ध्यापुत्रेण निर्वहेत् कार्यम्।" प्र + वह्—वहने, प्रवाहे। वि + वह्—विवाहे। सम् + वह् + णिच्—संवाहने, अङ्गमर्दने; संवाहयति।

वे (वेञ्) तन्तुसन्ताने (वस्त्रनिर्माणे)—बुनना—वयति, वयते, वास्यति, वास्यते। "वयति वयते तन्तु तन्तुवायः।" "यशः पटं वयति स्म तद्गुणैः।"

प्र + वे—वेधने, ग्रन्थने च; "शल्यप्रोतं मुनिपुत्रम्।"

शप् आक्रोशे (विरुद्धानुध्याने, शापे, गालिदाने, भर्त्सनायाम्); शपथकरणे च—(१) कोसना; सौगन्ध खाना—शपति, शपते; शप्स्यति शप्स्यते। (१) "अशपद् भव मानुषीति ताम्।" (२) "कृष्णाय शपते गोपी।" जिस व्यक्ति से शपथ किया जाता है, उसमें चतुर्थी, और जिस पदार्थ के नाम से शपथ किया जाता है, उसमें तृतीया होती है; "भरते-नात्मना चाहं शपे ते मनुजाधिप!। यथा नान्येन तुष्येयमृते रामविवा-सनात्।"

अभि + शप्—अभिशापे। "क्रोधेनाभिशपति।"

श्रि (श्रिञ्) आश्रये; प्राप्तौ च—(१) आश्रय करना; (२) प्राप्त होना—श्रयति; श्रयते; श्रयिष्यति, श्रयिष्यते।" (१) "यं देशं श्रयते तमेव कुरुते बाहुप्रतापार्जितम्।" (२) "परीता रक्षोभिः श्रयति विवशा कामपि दशाम्।"

आ + श्रि—अवलम्बने (सहारा लेना)। सम् + श्रि—आश्रये;

हृ (हृञ्) हरणे (प्रापणे; स्तेये; नाशने च)—(१) ले जाना;

(२) चोरी करना; (३) नष्ट करना—हरति, हरते; हरिष्यति; हरिष्यते। (१) द्विकर्मक—"हरति हरते गां वनं गोपः।" "सन्देशं मे हर।" (२) "दुर्वृत्ता जारजन्मानो हरिष्यन्तीति शङ्कया। मदीयपद्यरत्नानां मञ्जूषैषा मया कृता।" (३) "नापेक्षा न च दाक्षिण्यं न प्रीतिर्न च सङ्गतिः। तथाऽपि हरते तापं लोकानामुन्नतो घनः।"

हृ+णिच्—प्रापणे (किसी के द्वारा कुछ भेजना); नाशे, भ्रंशे, वियोगे (खोना); पराजये (हराना) च; हारयति। अनु+हृ–अनुकरणे। अप+हृ—अपहरणे (छीन लेना; चुराना)। अभि+अव+हृ—व्यवहारे। आ+हृ—आहरणे, आनयने। उत्+आ+हृ—दृष्टान्तोपन्यासे (नजीर देना); कथने च। वि+आ+हृ—व्याहारे, उक्तौ। सम्+आ+हृ—सङ्ग्रहे। उत्+हृ—उद्धारे (मोचने; उन्मूलने च)। उप+हृ—अन्तिकप्रापणे (पास ले जाना), उपढौकने च (भेंट करना)। निर्+हृ—अपनयने; प्रेतवहने च। परि+हृ—परित्यागे। प्र+हृ—प्रहारे, ताडने। वि+हृ—क्रीड़ायाम्। सम्+हृ—नाशने; प्रत्याकर्षणे (समेटना); संक्षेपे च। उप+सम्+हृ—उपसंहारे, समापने।

ह्वे (ह्वेञ्) स्पर्द्धायाम् (पराभिभवेच्छायाम्); आह्वाने च—(१) लड़ाई माँगना; (२) पुकारना—"ह्वयति ह्वयते मल्लो मल्लम्" (अभिभवितुमिच्छति)। (२) "ह्वयति जनं लोकः" (आह्वयतीत्यर्थः)। "तां पार्वतीति नाम्ना जुहाव।"

आ+ह्वे—(१) आह्वाने—परस्मैपदी—पुत्रमाह्वयति (२) स्पर्द्धायाम्—आत्मनेपदी—"कृष्णश्चाणूरमाह्वयते।"

भ्वादि अकर्मक उभयपदी धातु

राज् (राजृ) दीप्तौ (शोभायाम्)—शोभित होना—राजति, राजते; राजिष्यति; राजिष्यते। "राजन्! राजति वीरवैरिवनितावैधव्यदस्ते भुजः।"

वि+राज्+सुदीप्तौ। निर्+राज्+णिच्—प्रकाशने, विभूषणे;

नीराजने, निर्मञ्छने (आरती करना) च—नीराजयति। "नीराजयन्ति भूपालाः पादपीठान्तभूतलम्।"

अनुवाद

यादृशी भावना यस्य सिद्धिर्भवति तादृशी—जाकी रही भावना जैसी, हरि मूरति देखी तिन तैसी। जीर्णे वयसि न मां क्षुधा बाधते—मेरी वृद्धावस्था में भूख मुझे दुःख नहीं देती। इदञ्च मे मनसि वर्त्तते-मेरे मन में जो है यह वही ठीक है। ततः किं भवेत्—तब क्या होगा? सर्वं कान्तमात्मानं पश्यति—प्रत्येक व्यक्ति अपने को सुन्दर देखता है। भद्रमिदं न पश्यामि—मैं इसमें कुछ भलाई नहीं देखता। भाग्येनैतत् सम्भवति—यह सब भाग्य से होता है। हरन्तीमे जालं मम विहङ्गमाः-इन चिड़ियों ने मेरा जाल चुरा लिया। कथमस्मान् न सम्भाषसे—तुम हम लगों से क्यों नही बोलते? मधुरं कूजन्ति निकुञ्जे पक्षिणः—झाड़ी में चिड़ियाँ मधुर गान करती हैं। बलवती पिपासा मां बाधते—भीषण तृष्णा मुझे कष्ट देती है। कथं न पश्यसि रामस्यावस्थाम्—तुम राम की हालत को क्यों नहीं देखते? आत्मनो यौवनमुपालभस्व—अपनी जवानीको धिक्कारो। अत्रैव मुहूर्त्तं तिष्ठ—यहाँ एक क्षण रुको। कथमितोऽपि मामनुसरति—क्या! यहाँ भी मुझे अनुसरण करता है? ननु भवानग्रतो मे वर्त्तते—क्यों आप मेरे सामने खड़े हैं। त्वं ग्रामं व्रज—गाँवको जाओ। सुष्ठु शोभसे नित्यं त्वमनेन शीलेन—ऐसे सुन्दर चरित्र से तुम हमेशा उत्तम रूप से चमकते हो। बालको वृद्धमुप-हसति-बालक बुड्ढे की हँसी उड़ाता है। चक्रवत् परिवर्त्तन्ते दुःखानि च सुखानि च—गाड़ीके पहिये की तरह सुख-दुःख चक्कर लगाते हैं। रिक्तं हि पात्रं ध्वनति प्रकामम्—अधजल गगरी छलकत जाय। जगतः पितरौ वन्दे—जगत्-पिता तथा जगन्माता की वन्दता करता हूँ। तत्र वृक्षे कश्चित् वृद्धः शुको वसति-एक बुड्ढा सुग्गा उस पेड़ में रहता है।

वायुराचामति स्वेदं बलात् मुखे ते—हवा तेरे मुख में पसीना सुखा लेती है। वेपते अवश इव मे हस्तः–मेरा हाथ बेबस होकर काँपता है।

बरसात में बारिश होती है–वर्षासु वृष्टिर्भवति। वे राम के घर में ठहरे—रामस्य गृहे अतिष्ठंस्ते। बालकों को यह किताब पढ़ने दो—पठन्तु बालकाः पुस्तकमेतत्। सबको वह मठ देखना चाहिये—मठं तं सर्वे पश्येयुः। हमलोग नदी के किनारे गये थे—वयं नद्यास्तीरमगच्छाम। बुद्धिमान् व्यक्ति को आलस्य छोड़ना चाहिये—आलस्यं त्यजेत् सुधीः। ठंढा जल पियो—शीतलं जलं पिब। भगवान् हमलोगों को सब चीज देते हैं—ईश्वरोऽस्मभ्यः सर्वमेव यच्छति।

अभ्यास

संस्कृत में अनुवाद करो :—मैं जाता हूँ। हमलोग बोलते हैं। तुम दोनों पैदल चलते हो। हम दोनों हँसते हैं। वे दोनों रहते हैं। हरि हँस रहा है। हम लोग भोजन बनाते हैं। मैंने उसे कुछ पुस्तकें दीं। हवा लता को हिलाती है। तुम आ सकते हो। हम लोगों को जाना चाहिये। उसे जाने दो। वह पैदल चल सकता है। वह बहुत क्रोधित हुआ। वह बहुत दिन जी सकता है। उन्होंने जंगल में एक सिंह को देखा। गरीब लड़कियाँ कुछ आम चाहती हैं। बुरा संग हमेशा छोड़ना चाहिए। झूठ कभी मत बोलो। हरि को अपने श्वशुर के घर जाने दो। दिन में दोपहर के समय धूप में मत दौड़ो। साधु पुरुष के पास प्रार्थना निष्फल होनी भी अच्छी है, तो भी कृपण के पास कुछ भी नहीं माँगना चाहिए। अपने गुणों को छिपा रखो। सर्वान्तःकरण से ईश्वर का (द्वितीया) भजन करो। महात्मा दुर्वासा ने शकुन्तला को अभिशाप दिया था। वर्षा में किसान लोग खेत में बीज बोते हैं। इस पुस्तक को घर मैं ले जाऊँगा। विपद् में जिसका (द्वितीया) आश्रय करोगे, प्राणान्त में भी उसके ऊपर कुभाव नहीं लाना।

हिन्दी में अनुवाद करो :—विपश्चितः परिव्राजः अर्च्चन्ति। पुरस्तात् माल्यवान् गिरिः शोभते। मन्दं मन्दं वहति पवनः। मधु तिष्ठति जिह्वाग्रे

हृदये तु हलाहलम् । मनस्तु मे संशयमेव गाहते । लोको हि भीत एव आत्मानं रक्षति । न चलति खलु वाक्यं सज्जानानां कदाचित् । त्यजेदेकं कुलस्यार्थे ग्राम-स्यार्थे कुलं त्यजेत् । च्योतति घृतं वह्नौ यज्वा । आत्मानं सततं रक्षेत् दारैरपि धनैरपि । ग्राहो जले गजेन्द्रमपि कर्षति । प्रत्यूषे शयनं त्यजेत् । सततमात्मानं गोपायेत । निराश्रयं मां जगदीश रक्ष । सदृशं चेष्टते स्वस्याः प्रकृतेः ज्ञानवा-नपि । दूतः सर्वं जल्पति । ऋषयः ऋचः पठन्ति । पिता विदेशादागतं पुत्रं वदति । शिशुः पिबति दुग्धमुष्णम् । पक्षिणः मत्स्यान् खादन्ति । कुञ्जे मधुरं कूजन्ति कोकिलाः । कानने मृगा विचरन्ति । गाण्डीवं स्रंसते हस्तात् । वृक्षेषु नवानि कुड्मलानि स्फोटन्ते । अलीकं न वदेत् सुधीः । क्षणमपि तस्याावियोगं न सहते । उष्णालुः शिशिरे निषीदति । आलस्यं यत्नेन परित्यजेत् । यस्य यादृशमन्तरं स तदनुरूपमेव फलं भजते । जननी सर्वदा युवानमपि पुत्रमापदो रक्षति । यदि वपति कृषकः क्षेत्रेषु बीजम् । न हि कृतमुपकारं साधवो विस्मरन्ति । भरति कुम्भमद्भिर्जनः ।

दिवादि

क्रियाघटन-सूत्र

लट्, लोट्, लङ्, विधिलिङ्—ये चतुर्लकार परे रहने से, कर्तृवाच्य में दिवादिगणीय धातु के उत्तर में 'य' होता है; यथा–दिव्+ति= दिव्+य+ति=दीव्यति ।

'य' परे रहने से, दिव्—दीव्, सिव्—सीव्, दॄ—दीर, जॄ—जीर; व्यध्—विध्, और जन्-जा होता है। जैसे—दिव्+य+ति+दीव्यति।

'य परे रहने से, कर्तृवाच्य में' शम्—शाम्; श्रम—श्राम्, भ्रम्—भ्राम्, क्षम्—क्षाम्, तम्—ताम्, दम्—दाम्, क्लम्—क्लाम; मद्—माद्, भ्रन्श्—भ्रंश्; और रन्ज्—रंज् होता है।

चतुर्लकार परे रहने से, अन्त्य ओकार का लोप होता है यथा—शो+य+ति=श्यति ।

दिवादि परस्मैपदी धातु

दिव्(दिवु) क्रीडायाम्—खेलना

(अकर्मक—द्वितीयान्त अथवा तृतीयान्त 'अक्ष'—वाचक शब्द के साथ—अक्षैः अक्षान् वा दीव्यति)

लट्

	एकवचन	द्विवचन	बहुवचन
प्रथम पुरुष	दीव्यति	दीव्यतः	दीव्यन्ति
मध्यम पुरुष	दीव्यसि	दीव्यथः	दीव्यथ
उत्तम पुरुष	दीव्यामि	दीव्यावः	दीव्यामः

लोट्

प्रथम पुरुष	दीव्यतु	दीव्यताम्	दीव्यन्तु
मध्यम पुरुष	दीव्य	दीव्यतम्	दीव्यत
उत्तम पुरुष	दीव्यानि	दीव्याव	दीव्याम

लङ्

प्रथम पुरुष	अदीव्यत्	अदीव्यताम्	अदीव्यन्
मध्यम पुरुष	अदीव्यः	अदीव्यतम्	अदीव्यत
उत्तम पुरुष	अदीव्यम्	अदीव्याव	अदीव्याम

विधिलिङ्

प्रथम पुरुष	दीव्येत्	दीव्येताम्	दीव्येयुः
मध्यम पुरुष	दीव्येः	दीव्येतम्	दीव्येत्
उत्तम पुरुष	दीव्येयम्	दीव्येव	दीव्येम

लृट्

प्रथम पुरुष	देविष्यति	देविष्यतः	देविष्यन्ति
मध्यम पुरुष	देविष्यसि	देविष्यथः	देविष्यथ
उत्तम तुरुष	देविष्यामि	देविष्यावः	देविष्यामः

दिवादि सकर्मक परस्मैपदी धातु

अस् (असु) क्षेपणे—फेंकना—अस्यति; असिष्यति। "तस्मिन्नास्यदिषीकास्त्रम्।"—(२) अपनोदने। "स्त्रीणामास श्रमम्।"

अधि+अस्—आरोपे। अप+अस्—अपसारणे; त्यागे च। अभि+अस्—अभ्यासे, आवृत्तौ, पुनरनुष्ठाने, मुहुःकरणे। उत्+अस्-वि+उत्+अस्—निरासे, अपनयने। नि+अस्+निक्षेपे, स्थापने; त्यागे च। वि+नि+अस्—स्थापने। उप+नि+अस्—प्रस्तावे। सम्+नि+अस्—सन्न्यासे; "सन्दृश्य क्षणभङ्गुरं तदखिलं धन्यस्तु

सन्न्यस्यति।" निर्+अस्—दूरीकरणे। परि—अस्—विस्तृतौ; क्षेपणे; पातने च। वि+परि+अस्—विपर्य्यये। प्र+अस्—प्रक्षेपे। वि+अस्—अपनयने; विभागे च। सम्+अस्—सङ्क्षेपे, समासे; संयोगे।

इष् गतौ—इष्यति; एषिष्यति।

अनु+इष्-अन्वेषणे (ढूँढ़ना) प्र+इष्+णिच्-प्रेषणे (भेजना); क्षेपणे च; प्रेषयति।

क्षम् (क्षमू) सहने (मर्षणे, क्षमायाम्)-क्षमा करना-क्षाम्यति; क्षमिष्यति। क्षाम्यति दोषं साधुः।

गृध् (गृधू) लिप्सायाम् (आकाङ्क्षायाम्)—लालच करना—गृध्यति; गर्धिष्यति। गृध्यति धनं लुब्धः।

पुष् पोषणे (उपचये); पुष्टौ च-(१) पुष्ट करना, बढ़ाना; (२) पुष्ट होना (अकर्मक)—पुष्यति; पोक्ष्यति। "कामप्यभिख्यां स्फुरितैरपुष्यदासन्नलावण्यफलोऽधरोष्ठः।" "वर्णं पुष्यत्यनेकं सरयूप्रवाहः।" "देहमपुष्यः सुरामिषैः।"

लुभ् आकाङ्क्षायाम् (लोभे)-लालच करना-लुभ्यति, लोभिष्यति। "लुभ्यति धने लुब्धः।" परन्तु चतुर्थी और सप्तमी के साथ प्रयुक्त होता है। "तथाऽपि रामो लुलुभे मृगाय।" "धर्मे लुभ्यति यः सदा।"

व्यध् ताडने (पीडने, वेधने)—बींधना, चुभाना, छेदना-विध्यति; व्यत्स्यति। "विध्यति शत्रुं शूरः।" "विविधुस्तोमरैः।"

अनु+व्यध्—सम्पर्के; व्यापने; ग्रथने च। अप+व्यध्—निक्षेपे; निरासे; त्यागे; प्रेरणे च। आ+व्यध्—क्षेपे, निःसारणे; धारणे, परिधाने च।

शो तीक्ष्णीकरणे—पैनाना—श्यति, शास्यति।

नि+शो—निशाने, तेजने, तीक्ष्णीकरणे।

श्लिष् (श्लिषु) आलिङ्गने; योगे च—(१) गले लगाना; (२) संयुक्त होना (अकर्मक);—श्लिष्यति; श्लेक्ष्यति। (१) "श्लिष्यति वृक्ष लता।"

आ+श्लिष्—आलिङ्गने; योगे च। वि+श्लिष्-वियोगे। प्र+श्लिष्—वियोगे। सम्+श्लिष्+संयोगे।

सिव्—(षिवु) तन्तुविस्तारे (सीवने, तन्तुभिर्ग्रथने)—सीना—सीव्यति; सेविष्यति। "सीव्यति वस्त्रं सौचिकः।"

सो (षो) नाशने—नष्ट करना—स्यति; सास्यति। "स्यति यमो जन्तून्।"

अव+सो—अवसाने, समाप्तौ। अधि+अव+सो—अध्यवसाये (उत्साहे, निश्चये च)। परि+अव+सो—पर्य्यवसाने, समाप्तौ, परिणामे। प्रति+अव+सो—प्रत्यवसाने, भोजने। वि+अव+सो—व्यवसाये, उद्यमे, चेष्टायाम्। अनु+वि+अव+सो—अनुव्यवसाये (बुद्धार्थस्य पुनर्बोधे)।

दिवादि अकर्मक परस्मैपदी धातु

कुप् क्रोधे—क्रुद्ध होना-कुप्यति; कोपिष्यति। जिस पर क्रोध किया जाता है, उसमें प्रायः चतुर्थी होती है। "कुप्यति माता शिशवे।" "कुप्यन्तिहितवादिने।" किन्तु "प्रति" शब्द के योग से द्वितीया, और उपरि-शब्द के साथ षष्ठी भी होती है; "मां प्रति स कुपितः।" "कुपितश्चन्द्रगुप्तश्चाणक्यस्योपरि।"

प्र+कुप्—अतिकोपे; प्राबल्ये च—"दोषाः प्रकुप्यन्ति।"

क्रुध् कोपे—रोष करना—क्रुध्यति; क्रोत्स्यति।

क्लम् (क्लमु) ग्लानौ (श्रमे)-क्लान्त होना, थकना-क्लाम्यति, क्लमिष्यति। "कायः क्लाम्यति तस्य प्रहरतो रिपून्।"

क्लिद् (क्लिदू) आर्द्रीभावे—भीगना—क्लिद्यति; क्लेदिष्यति, क्लेत्स्यति। "क्लिद्यति वस्त्रं पयसा।"

क्षुभ् सञ्चलने[1] (क्षोभे, विकारे, उद्वेगे)-क्षुब्ध होना, विचलित होना,

---

१. इसी अर्थ में क्षुभ् धातु भ्वादिगणीय भी होता है। जैसे—लट्—क्षोभते।

घबराना—क्षुभ्यति; क्षोभिष्यति। "महाह्लद इव क्षुभ्यन्।"

प्र+क्षुभ्, सम्+क्षुभ्—सञ्चलने। वि+क्षुभ्+णिच्—विलोडने; विक्षोभयति।

जॄ (जॄष्) वयोहानौ (जरायाम्, जीर्णीभावे; क्षये; विलये; परिपाके)—(१) जीर्ण होना; क्षीण होना; (२) नष्ट होना; (३) पचना–जीर्य्यन्ति, जरिष्यति, जरीष्यति; (१) "जीर्य्यन्ते जीर्य्यतः केशा दन्ता जीर्य्यन्ति, जीर्य्यतः। जीर्य्यतश्चक्षुषी श्रोत्रे, तृष्णैका तरुणायते॥" (२) "सौहृदानि जीर्य्यन्ति कालेन।" (३) "उदरे चाजरन्नन्ये।"

तम् (तमु) ग्लानौ (खेदे, श्रान्तौ; व्यथायाम्; कृशीभावे)—(१) श्रान्त होना; (२) परेशान होना; (३) मुरझाना–ताम्यति; तमिष्यति। (१) "ललितशिरीषपुष्पहननैरपि ताम्यति यत्।" (२) प्रविशति मुहुः कुञ्जं, गुञ्जन् मुहुर्मुहु ताम्यति।" (३) "गाढोत्कण्ठा-लुलितलुलितैरङ्गकैस्ताम्यतीति।"

उत्+तम्—उत्कण्ठायाम्। सम्+तम्—ग्लानौ।

तुष् प्रीतौ—तुष्ट होना—तुष्यति; तोक्ष्यति। "तुष्यन्ति ब्राह्मणा नित्यम्।" तृतीयान्त पद के साथ—"रत्नैर्महार्हैस्तुतुषुर्न देवाः।"

परि+तुष्, प्र+तुष्—परितोषे। सम्+तुष—सन्तोषे।

तृप् तृप्तौ—तृप्त होना, राजी होना—तृप्यति; तर्पिष्यति, तर्प्स्यति, त्रप्स्यति। प्रायशः तृतीया के साथ, परन्तु कहीं षठी और सप्तमी के साथ भी प्रयुक्त होता है; 'को न तृप्यति वित्तेन।" "नाग्निस्तृप्यति काष्ठानाम्।" "तस्मिन् हि ततृपुर्देवास्तते यज्ञे।"

परि+तृप्—सम्यक्तृप्तौ।

तृष् (ञितृष्) पिपासायाम् (तृष्णायाम्; आकाङ्क्षायाम्)—प्यासा होना—तृष्यति; तर्षिष्यति। "क्षताश्च कपयोऽतृषन्॥"

त्रस् (त्रसी) उद्वेगे (त्रासे)–डरना–त्रस्यति, त्रसति; त्रसिष्यति "प्रमदवनात् त्रस्यति।" "त्रस्यति कः सति नाश्रयबाधने ?"

दम् (दमु) उपशमे (शान्तीभावे); शान्तीकरणे (शासने दमने) च-(१) शान्त होना; (२) दबाना (सकर्मक)-दाम्यति; दमिष्यति। (१) "दाम्यति मुनिः।" (२) "यमो दाम्यति राक्षसान्।"

दुष् वैकृत्ये (अशुद्धीभावे, दोषे)—दोषयुक्त वा अशुद्ध होना—दुष्यति; दोक्ष्यति। दुष्यति लोकः पापात्; "देवान् पितॄँश्चार्चयित्वा खादन् मांसं न दुष्यति।"

प्र+दुष्—व्यभिचारे।

दृप् गर्वे (दर्पे)—घमण्ड करना—दृप्यति; दर्पिष्यति, द्रप्स्यति, दर्प्स्यति। "स किल नात्मना दृप्यति।" "को न दृप्यति वित्तेन ?"

दॄ विदारे—फटना—दीर्यति, दरिष्यति, दरीष्यति। "हृदयं दीर्य्यतीव मे।"

अव+दॄ+णिच्—अवदारणे, खनने, अवदारयति—वि+दॄ+णिच्—विदाहरणे (फाड़ना), विदारयति।

द्रुह् जिघांसायाम् (अनिष्टचिन्तने, अपकारे)—बुराई चाहना, वैर करना—द्रुह्यति, द्रोहिष्यति, ध्रोक्ष्यति। जिसपर द्रोह किया जाता है, उसमें चतुर्थी होती है, "द्रुह्यति खलः साधवे।" "योऽन्वेति मां द्रुह्यति मह्यमेव साऽत्रेत्युपालम्भि तयाऽऽलिवर्गः।"

अभि+द्रुह—अपकारे।

नश् (णश्) नाशे (क्षये, मरणे), अदर्शने (लुक्कायने पलायने) च—(१) नष्ट होना, (२) अदृश्य होना, छिप जाना, (३) भागना—नश्यति, नशिष्यति, नङ्क्ष्यति। (१) "जीवनाशं ननाश च।" (२) "ध्रुवाणि तस्य नश्यन्ति।" (३) "नेशुश्चित्रा निशाचराः।"

प्र+नश्—'णश्'—पूर्ववत्, प्रणाशः, प्रनष्टः। वि+नश्–विनाशे।

नृत् (नृती) नर्त्तने—नाचना—नृत्यति, नर्त्तिष्यति, नर्त्स्यति। "नृत्यति युवतिजनेन समं सखि !"

पुष्प् विकासे—खिलना—पुष्पति, पुष्पिष्यति। "पुष्पति कुन्दकोरकम्,।" "सरदि पुष्प्यन्ति सप्तच्छदाः।"

भ्रंश् (भ्रन्शु) अधःपतने--भ्रष्ट होना, च्युत होना; भ्रश्यति; भ्रंशिष्यति। "भ्रश्यन्ति कर्णोत्पलग्रन्थयः।" "सत्यान्नाभ्रश्यत स्वर्गफलाद् गुरुर्नः।" प्रायशः पञ्चमी के साथ।

परि+भ्रंश्, प्र+भ्रंश्—च्युतौ, हानौ। "यदक्षरं परिभ्रष्टम्।"

भ्रम् (भ्रमु) चलने (भ्रमणे); भ्रान्तौ (अयथार्थज्ञाने) च-(१) घूमना; (२) चूकना—भ्राम्यति; भ्रमिष्यति। (१) "सूर्य्यो भ्राम्यति, नित्यमेव गगने।" (२) "आभरणकारस्तु तालव्य इति बभ्राम।"

मद् (मदी) हर्षे; मत्ततायाञ्च—(१) आनन्दित होना; (२) मतवाला होना—माद्यति, मदिष्यति। (१) "सर्वलोकातिशायिन्या विभूत्या न च माद्यति।" (२) "वीक्ष्य मद्यमितरा तु ममाद।"

उत्+मद्—उन्मादे, चित्तविकारे। प्र+मद्—प्रमादे, अनवधानतायाम् (असावधान होना); "न प्रमाद्यन्ति प्रमदासु विपश्चितः।"

मुह् अविवेके (मोहे, ज्ञानरहितीभावे)—मुग्ध होना, विवेकरहित होना, संज्ञाहीन होना—मुह्यति; मोहिष्यति, मोक्ष्यति। "आपत्स्वपि न मुह्यन्ति नराः पण्डितबुद्धयः।" "स शुश्रुवांस्तद्वचनं मुमोह।"

यस (यसु) प्रयत्ने; यस्यति।

आ+यस्—प्रयत्ने; "दैन्यादुन्मुखदर्शनापलपनैः पिण्डार्थमायस्यतः सेवां लाघवकारिणीं कृतधियः स्थाने श्ववृत्तिं विदुः।" खेदे च—"आयस्यसि तपस्यन्ति।" आ+यस्+णिच्—पीडने; "आयासयति मां जलाभिलाषः।" प्र+यस्—प्रयत्ने; "पुनः पुनः प्रायसदुत्प्लवाय सः।"

राध् सिद्धौ (निष्पत्तौ)—निष्पन्न होना—राध्यति; रात्स्यति। राध्यत्योदनः।

अप+राध्—अपराधे, अनिष्टाचरणे (अपराध करना); व्यक्ति और वस्तुवाचक शब्द की षष्ठी तथा सप्तमी के साथ—"अपराद्धोऽस्मि तत्रभवतः कण्वस्य।" "यस्मिन् कस्मिन्नपि पूजार्हेऽपराद्धा शकुन्तला।" कहीं चतुर्थी के साथ भी प्रयुक्त होता है—"न दूये, सात्वतीसूनुर्यन्मह्यमपराध्यति।" वि+राध्-अपकारे, द्रोहे। "क्रियासमभिहारेण विराध्यन्तं क्षमेत कः?" "विराद्ध एवं भवता विराद्धा बहुधा च नः।"

शम् (शमु) उपशमे (शान्तभावे; निवृत्तौ)—शान्त होना—शाम्यति; शमिष्यति। "शाम्येत् प्रत्यपकारेण नोपकारेण दुर्जनः।" "न जातु कामः कामानामुपभोगेन शाम्यति।"

उप + शम्—वत्। नि + शम्—श्रवणे। "निशम्य शब्दान्।" नि + शम् + णिच्-श्रवणे; दर्शने च। "निशमयति वचः" (शृणोतीत्यर्थः)। दर्शने तु—"रूपं निशामयति।" "निशामय प्रियसखि !"—इत्यत्र तु श्रवणार्थः।

शुध् शौचे (शुद्धौ)-शुद्ध होना-शुध्यति; शोत्स्यति। "अद्भिर्गात्राणि शुध्यन्ति, मनः सत्येन शुध्यति।"

शुध् + णिच्—उन्मूलने; ऋणोद्वारे; अशुद्धिसंशोधने च; शोधयति। परि + शुध् + णिच्—ऋणोद्धारे; कण्टकाद्यपसारणे; भ्रमादिसंशोधने च। वि + शुध्—शुद्धौ।

शुष् शोषे (स्नेहरहितीभावे)—सूखना—शुष्यति; शोक्ष्यति। "शुष्यति धान्यमातपेन।" परि, वि, सम् + शुष्—अतिशोषे।

श्रम् (श्रमु) तपसि; खेदे (श्रमे, क्लान्तौ; दुःखे) च—(१) तपस्या करना, (२) थकना; दुखी होना—श्राम्यति; श्रमिष्यति। (१) "कियच्चिरं श्राम्यसि गौरि !" (२) "आतिथेयमनिवारितातिथिः कर्त्तुमाश्रमगुरुः स नाश्रमत्।" "यो वृन्दानि त्वरयति पथि श्राम्यतां प्रोषितानाम्।"

परि + श्रम्—परिश्रमे—वि + श्रम्-विश्रामे। "विश्राम्यति यथासुखम्।"

साध् निष्पत्तौ—निष्पन्न, साधित, या पूरा होना—साध्यति; सात्स्यति। "साध्यति घटः" (निष्पन्नः स्यात् इत्यर्थः)।

साध् + णिच्—सम्पादने; प्राप्तौ, पराजये; वधे गमने च-"साधयाम्यहमविघ्नमस्तु ते।" साधयति। प्र + साध् + णिच्—अलङ्करणे; कण्टकशोधने, वैरनिर्यातने च।

सिध् (षिध्) संराद्धौ (निष्पत्तौ)—सिद्ध होना—सिध्यति, सेत्स्यति। "उद्यमेन हि सिध्यन्ति कार्य्याणि न मनोरथैः।"

स्निह् (ष्णिह्) प्रीतौ (स्नेहे)–प्यार करना–स्निह्यति; स्नेहिष्यति, स्नेक्ष्यति। "स्निह्यति बन्धुजनः।" जिस पर स्नेह किया जाता है उसमें सप्तमी होती है, "किन्नु खलु बालेऽस्मिन् औरस इव पुत्रे स्निह्यति मे मनः ?"

स्विद् (ञिस्विदा) गात्रप्रक्षरणे (घर्मच्युतौ) पसीजना—स्विद्यति; स्वेत्स्यति। "न च स्विद्यति तस्याङ्गम्।"

हृष् तुष्टौ (आह्लादे)–खुश होना-हृष्यति; हर्षिष्यति। हृष्यात् लोकः सुखात्। (२) लोमहर्षे (बाल खड़ा होना); "हृष्यन्ति रोपकूपानि।"

दिवादि आत्मनेपदी धातु

मन् ज्ञाने (सम्भावने)—सोचना

(सकर्मक–"आत्मानं मन्यते बलिनं बली।"–बहु+मन्–श्लाघा-याम्। "कथं भवान् मन्यते ?"—आपका क्या मत है ?)

लट्

	एकवचन	द्विवचन	बहुवचन
प्र० पु०	मन्यते	मन्येते	मन्यन्ते
म० पु०	मन्यसे	मन्येथे	मन्यध्वे
उ० पु०	मन्ये	मन्यावहे	मन्यामहे

लोट्

प्र० पु०	मन्यताम्	मन्येताम्	मन्यन्ताम्
म० पु०	मन्यस्व	मन्येथाम्	मन्यध्वम्
उ० पु०	मन्यै	मन्यावहै	मन्यामहै

लङ्

प्र० पु०	अमन्यत	अमन्येताम्	अमन्यन्त
म० पु०	अमन्यथाः	अमन्येथाम्	अमन्यध्वम्
उ० पु०	अमन्ये	अमन्यावहि	अमन्यामहि

विधिलिङ्

	एकवचन	द्विवचन	बहुवचन
प्र० पु०	मन्येत	मन्येयाताम्	मन्येरन्
म० पु०	मन्येथाः	मन्येयाथाम्	मन्येध्वम्
उ० पु०	मन्येय	मन्येवहि	मन्येमहि

लृट्

प्र० पु०	मंस्यते	मंस्येते	मंस्यन्ते
म० पु०	मंस्यसे	मंस्येथे	मंस्यध्वे
उ० पु०	मंस्ये	मंस्यावहे	मंस्यावहे

अनु + मन्—अनुमतौ, आदेशे, स्वीकारे च। "देवराय प्रदातव्या यदि कन्याऽनुमन्यते।" अभि + मन्—चिन्तने, विचारणे, विवेचने; इच्छायाञ्च। अव + मन्—अवज्ञायाम्। सम् + मन्—सम्मानने, पूजायाम्।

जन् (जनी) प्रादुर्भावे (उत्पत्तौ)—उत्पन्न होना। अकर्मक—"घटी जायते।" "गोमयाद् वृश्चिको जायते।" "अनिष्टादिष्टलाभेऽपि न गतिर्जायते शुभा।"

लट्

प्र० पु०	जायते	जायेते	जायन्ते
म० पु०	जायसे	जायेथे	जायध्वे
उ० पु०	जाये	जायावहे	जायामहे

लोट्

प्र० पु०	जायताम्	जायेताम्	जायन्ताम्
म० पु०	जायस्व	जायेथाम्	जायध्वम्
उ० पु०	जायै	जायावहै	जायामहै

लङ्

	एकवचन	द्विवचन	बहुवचन
प्र॰ पु॰	अजायत	अजायेताम्	अजायन्त
म॰ पु॰	अजायथाः	अजायेथाम्	अजायध्वम्
उ॰ पु॰	अजाये	अजायावहि	अजायामहि

विधिलिङ्

प्र॰ पु॰	जायेत	जायेयाताम्	जायेरन्
म॰ पु॰	जायेथाः	जायेयाथाम्	जायेध्वम्
उ॰ पु॰	जायेय	जायेवहि	जायेमहि

लृट्

प्र॰ पु॰	जनिष्यते	जनिष्येते	जनिष्यन्ते
म॰ पु॰	जनिष्यसे	जनिष्येथे	जनिष्यध्वे
उ॰ पु॰	जनिष्ये	जनिष्यावहे	जनिष्यामहे

उत्पत्ति अर्थमें—अभि, उप, प्र, वि और सम् उपसर्गके साथ 'जन्'—धातु प्रयुक्त होता है। किन्तु 'प्र' और 'वि' उपसर्गके साथ सकर्मक भी कहीं होता है—'प्रसव करना' अर्थ में; "प्रजायन्ते सुतान् नार्यः।"

सू (षूङ्) प्रसवे (जनने, उत्पादने)—पैदा करना, जनना

(सकर्मक—सूयते पुत्रं नारी; धर्मोऽर्थं सूयते)

लट्

	एकवचन	द्विवचन	बहुवचन
प्र॰ पु॰	सूयते	सूयेते	सूयन्ते
म॰ पु॰	सूयसे	सूयेथे	सूयध्वे
उ॰ पु॰	सूये	सूयावहे	सूयामहे

लोट्

प्र० पु०	सूयताम्	सूयेताम्	सूयन्ताम्
म० पु०	सूयस्व	सूयेथाम्	सूयध्वम्
उ० पु०	सूयै	सूयावहै	सूयामहै

लङ्

प्र० पु०	असूयत	असूयेताम्	असूयन्त
म० पु०	असूयथाः	असूयेथाम्	असूयध्वम्
उ० पु०	असूये	असूयावहि	असूयामहि

विधिलिङ्

प्र० पु०	सूयेत	सूयेयाताम्	सूयेरन्
म० पु०	सूयेथा	सूयेयाथाम्	सूयेध्वम्
उ० पु०	सूयेय	सूयेवहि	सूयेमहि

लृट्

प्र० पु०	सविष्यते / सोष्यते	सविष्येते / सोष्येते	सविष्यन्ते / सोष्यन्ते
म० पु०	सविष्यसे / सोष्यसे	सविष्येथे / सोष्येथे	सविष्यध्वे / सोष्यध्वे
उ० पु०	सविष्ये / सोष्ये	सविष्यावहे / सोष्यावहे	सविष्यामहे / सोष्यामहे

अभ्यास

संस्कृत में अनुवाद करो—जन्म से शूद्र उत्पन्न होता है। वस्त्रोंको सिया था। वह यहाँ नाचा था। ज्वरसे उसका शरीर जीर्ण हो गया। ध्रुव ने विजन वन में कृष्ण की (द्वितीया) आराधना की थी, इसलिए उसका मनोरथ सिद्ध हुआ। उस हरिण को बाणसे विद्ध मत करो। कुटिल मनुष्य अपना भाव हृदय में पोषण करते हैं। प्रचण्ड आतप-तापसे देह का रक्त शुष्क होता है। माता पुत्र का आलिङ्गन करती है।

———

दिवादि सकर्मक आत्मनेपदी धातु

पद् गतौ (प्राप्तौ च)—(१) जाना; (२) पाना-पद्यते; पत्स्यते । (२) "ज्योतिषामाधिपत्यञ्च प्रभावश्चाप्यपद्यत ।"

अनु, अभि + पद्—प्राप्तौ । आ + पद्—प्राप्तौ; विपत्प्राप्तौ च—"अर्थधर्मौ परित्यज्य यः काममनुवर्त्तते । एवमापद्यते क्षिप्रं राजा दशरथो यथा ।" वि + आ + पद्—मरणे । वि + आ + पद् + णिच्—व्यापादने, हनने; व्यापादयति । उत् + पद्—उत्पत्तौ । वि + उत् + पद्-व्युत्पत्तौ । उप + पद् + (१) योग्यतायाम्; "मद्भावायोपपद्यते" (उपयुक्तो भवति,) "नैतत् त्वय्युपपद्यते" (योग्यं न भवति); (२) सम्भावने; "पुत्रदौहित्रयोर्विशेषो नोपपद्यते" (न सम्भाव्यते); (३) प्राप्तौ; "उपपद्यस्व स्वकर्मोचितां गतिम्"; (४) सिद्धौ, सम्पन्नतायाम्; "सर्वं सखे त्वय्युपपन्नमेतत् ।" अभि + उप + पद्-अनुग्रहे । निर् + पद्-निष्पत्तौ,सिद्धौ । प्र + पद्-गतौ; प्राप्तौ च; "ये यथा मां प्रपद्यन्ते" (समाश्रयन्ते) । प्रति + पद्—प्राप्तौ; ज्ञाने; अङ्गीकारे; उत्तरदाने च—"कथं प्रतिवचनमपि न प्रतिपद्यते ?" प्रति + पद् + णिच्—बोधने । वि + प्रति + पद्—विरोधे, विरुद्धज्ञाने; संशये । वि + पद्—विपत्तौ; मरणे च । सम् + पद्-सम्पन्नतायाम् (होना;) "सम्पत्स्यते वः कामोऽयम् ?" "सम्पत्स्यन्ते नभसि भवतो राजहंसाः सहाया । (भविष्यन्ति;) "साधोः शिक्षा गुणाय सम्पद्यते; नासाधोः" (गुणम् उत्पादयति इत्यर्थः) ।—सदा चतुर्थी के साथ । सम् + हृद् + णिच्—सम्पादने; सम्पादयति ।

बुध् ज्ञाने; जागरणे च-(१) समझना; (२) जागना (अकर्मक)—बुध्यते; भोत्स्यते । (१) "बुध्यते शास्त्रं सुधीः ।" (२) "ते च प्रापुरुन्दन्वन्तं बुबुधे चादिपूरुषः ।"

अनु + बुध्—स्मरणे; ज्ञाने । अव + बुध्—ज्ञाने । उत् + बुध—विकासे; जागरणे च । नि + बुध्-ज्ञाने । "तान्निबोध द्विजोत्तम !" श्रवणे च; भ्वादि; परस्मैपदी—निबोधति । प्र + बुध्-जागरणे; विकासे; ज्ञाने च । प्रति, वि + बुध्—जागरणे । सम् + बुध—ज्ञाने ।

दिवादि अकर्मक आत्मनेपदी धातु

खिद् दैन्ये (दीनभावे, उपतप्तीभावे, दुःखानुभवे)—दुःख पाना, खिन्न होना—खिद्यते; खेत्स्यते । "स्वसुखनिरभिलाषः खिद्यसे लोक-हेतोः ।" "स पुरुषो यः खिद्यते नेन्द्रियैः ।"

डी (डीङ्) उड्डयने (नभोगमने) उड़ना—डीयते; डयिष्यते । डीयन्ते पक्षिणः गगने ।

दीप् (दीपी) दीप्तौ (उज्ज्वलीभावे, प्रकाशे, शोभायाम्; ज्वलने)–चमकना—दीप्यते; दीपिष्यते । "दीप्यते निशि चन्द्रमाः ।"

उत्, प्र, सम् + दीप्—ज्वलने ।

दू (दूङ्) उपतापे (खेदे)—दुःखित होना—दूयते; दविष्यते । "दुर्जनोक्त्या न दूयते ।"

प्री (प्रीङ्) प्रीतौ—प्रसन्न होना–प्रीयते; प्रेष्यते । "प्रकाममप्रीयत यज्ज्वनां प्रियः ।"

युज् समाधौ (चित्तवृत्तिनिरोधे;) योग्यभावे च—(१) चित्त को एकाग्र करना; (२) योग्य होना—युज्यते; योक्ष्यते । (१) "युज्यते योगी ।" (२) शेषोक्त अर्थमें षष्ठी और सप्तमी के साथ प्रयुक्त होता हैं; "त्रैलोक्यस्यापि प्रभुत्वं त्वयि युज्यते ।"

युध् युद्धे (अभिभवेच्छायाम्) लड़ाई करना—युध्यते; योत्स्यते । 'तुण्डघातमयुध्यत ।"

ली (लीङ्) श्लेषे (लीनभावे)—लीन होना (चिपटना; छिपकर रहना; गायब होना; गलना)–लीयते; लेष्यते । "लीयते चन्द्रः सूर्य्ये ।" "(भृङ्गाङ्गनाः) लीयन्ते मुकुलान्तरेषु शनकैः सञ्जातलज्जा इव ।"

नि + ली—संश्लेषे; निभृतावस्थाने (छिपना) च । वि + ली—नाशे; द्रवीभावे (पिघलना) । अवस्थाने च—"पुरोऽस्य यावन्न भुवि व्यलीयत ।" वि + ली + णिच्—द्रवीकरणे । "लवणं विलीयते जले ।"

विद् सत्तायाम् (विद्यमानतायाम्)—रहना—विद्यते, वेत्स्यते । "अपापानां कुले जाते मयि पापं न विद्यते ।"

निर् + विद्—आत्मावज्ञायाम्; अनुतापे; वैराग्ये च। "निर्विद्यते चित्तं मम विषये।"

दिवादि सकर्मक उभयपदी धातु

नह् (णह्) बन्धने-बाँधना-नह्यति, नह्यते; नत्स्यति, नत्स्यते। "पुरावभासे विपणिस्थपण्या सर्वाङ्गनद्धाभरणेव नारी।" "शैलेयनद्धेषु शिलातलेषु निषेदुः।"

अपि + नह्—बन्धने; आच्छादने च; प्रायः अकार का लोप होता है; "मन्दारमाला हरिणा पिनद्धा।" "कवचं पिनह्य।" उत् + नह् = "उन्नमय्य बन्धने।" परि + नह्—वेष्टने। सम् + नह्—आच्छादने; मिलने; उद्योगे (आत्मनेपदी) च—"छेत्तुं वज्रमणीञ् शिरीषकुसुम-प्रान्तेन सन्नह्यते।"

मृष्—तितिक्षायाम् (क्षमायाम्)-सहना; क्षमा करना—मृष्यति, मृष्यते; मर्षिष्यति, मर्षिष्यते। "वासन्ती—तत् किमिदमकार्य्यमनुष्ठितं देवेन ? रामः—लोको न मृष्यतीति।" "मृष्यन्तु लवस्य बालिशतां तातपादाः।"

दिवादि अकर्मक उभयपदी धातु

क्लिश् उपतापे (क्लेशे)—क्लेश पाना—क्लिश्यति, क्लिश्यते; क्लेशिष्यते, क्लेशिष्यते। वोपदेवमते—उभयपदी; पाणिनिमते—आत्मनेपदी। "त्रयः परार्थे क्लिश्यन्ति साक्षिणः प्रतिभूः कुलम्।"

रञ्ज् (रन्ज्) रागे; आसक्तौ; रक्तीभावे च—(१) अनुरक्त होना, आसक्त होना; (२) लाल होना—रज्यति, रज्यते; रङ्क्ष्यति, रङ्क्ष्यते। (१) "देवानियं निषधराजरुचस्त्यजन्ती रूपादरज्यत नले न विदर्भसुभ्रूः।" "को न रज्यति क्रीडायाम् ?"

रञ्ज् + णिच्-लाक्षादिना रक्तीकरणे (रंगना), प्रसादने च (प्रसन्न करना) रञ्जयति; अनु + रञ्ज्—अनुरागे। अप + रञ्ज्—विरागे। उप + रञ्ज्—उपरागे, राहुग्रासे। वि + रञ्ज्—विरागे।

अभ्यास

हिन्दी में अनुवाद करो—पक्षिणः नभसि उड्डीयन्ते। यत्नेन विना किमपि न सिध्यति। सरसि कमलानि जायन्ते। दुःखात् दुःखमुत्पद्यते। वृष्ट्या च प्रजानां पुष्टिर्जायते। आत्मा वै जायते पुत्रः। आदित्यात् जायते वृष्टिः, वृष्टेरन्नं ततः प्रजाः। कृश्यति चन्द्रः कृष्णपक्षे। कायः क्लाम्यति यस्य प्रहरतो रिपून्। सूर्यो भ्राम्यति नित्यमेव गगने। यस्यां गुरुजन एवं तुष्यति। विपदि न मुह्येत् धीरः। पुरुषकारेण विना दैवं न सिध्यति। तस्य त्रयः पुत्राः अजायन्त। ते खलु निशि हृष्यन्ति। नहि धीरः कदाचिद् भिया क्षुभ्यति। यो न कुप्यति विप्राय। व्यसनिनां पर्याप्तं धनं भुवि न विद्यते। तप्यते तपस्तापसः। को न तृप्यति वित्तेन ? सह मेघेन तडित् प्रलीयते।

संस्कृत में अनुवाद करो—हम दोनों ने उसकी सेवा की। हम समझ सकते हैं। उसे लड़ने दो। सूर्य्य चमकता है। वह बहुत परिश्रम करता है। वे पासा खेल रहे हैं। उसकी आँख में तीर मत चलाओ। उसे नाचने दो। मैं नाच सकता हूँ। भगवान् स्वर्ग में खेलते हैं। चिड़ियाँ आसमान में उड़ती हैं। उसने अपने मित्र को नुकसान पहुँचाया। जो जिसके योग्य है विद्वान् उसी से उसे मिला देते हैं। विनोदिनी ने दो सन्तानों का (द्वितीया) प्रसव किया है। लक्ष्मण ने इन्द्रजित् के साथ युद्ध किया। वे पद-पद में (प्रतिपदम्) विपन्न होते हैं। काम तीन दिनों में सम्पन्न हुआ था। जो इसे समझेगा, वह फल पायेगा। उसके परुष भाषण से सब लोग दुःखित हुए। यदि वन में व्याघ्र न रहे, तो जाओ। हम कभी उनके वचन से खिन्न नहीं होंगे। सब लोगों ने वक्ता के वाक्य का आशय अच्छी प्रकार से नहीं समझा।

स्वादि

क्रियाघटन-सूत्र

चतुर्लकार परे रहने से, कर्तृवाच्य में स्वादिगणीय धातु के उत्तर 'नु' आगम होता है; यथा—सु + ति = सु + नु + ति = सुनोति ।

सगुण (ति; सि; मि, तु, द्, स्, आनि, आव, आम, अम्, ऐ, आवहै, आमहै) विभक्ति परे रहने से, 'नु' और 'उ' इन दोनों आगमों का गुण होता है; यथा—सुनोति । उ—तन् + उ + ति = तनोति ।

'नु' परे रहने से 'श्रु' के स्थान में 'शृ' और 'धिव्' के स्थान में 'धि' होता है; यथा—श्रु + ति=श्रु + नु + ति=शृ + णु + ति=शृ + णो + ति= शृणोति । धिव् + नु + ति=धि + नु + ति = धि + नो + ति = धिनोति ।

अगुण विभक्ति का स्वरवर्ण परे रहने से स्वरवर्ण के परस्थित 'नु' और 'उ' आगमों के उकार के स्थान में 'व्' और व्यञ्जन वर्ण के परस्थित 'नु' के उकार के स्थान में 'उव्' होता है; यथा— (स्वर) श्रु + अन्ति = श्रु + नु + अन्ति=शृ + णु + अन्ति=शृण्वन्ति । (व्यञ्जन) शक् + अन्ति = शक् + नु + अन्ति = शक् + न् + उव् + अन्ति = शक्नुवन्ति ।

'व' और 'म' परे रहने से 'नु' और 'उ' आगमों के उकारका विकल्पसे लोप होता है; किन्तु 'नु' व्यञ्जन वर्ण में मिलित होने से नहीं यथा—(नु) शृणु + वः = शृण्वः, शृणवः । (उ) तन् + उ + वः = तन्वः, तनुवः । व्यञ्जन—शक्नुवः ।

अकार-भिन्न अन्य वर्ण के परस्थित 'अन्ते', 'अन्ताम्' और 'अन्त' विभक्ति के नकार का लोप होता है; यथा—अश्नुव् + अन्ते = अश्नुव् + अते = अश्नुवते ।

स्वादि परस्मैपदी धातु

श्रु श्रवणे—सुनना

(सकर्मक—"शृणु वत्स ! मयोक्तं हि")

लट्

	एकवचन	द्विवचन	बहुवचन
प्र० पु०	शृणोति	शृणुत	शृण्वन्ति
म० पु०	शृणोषि	शृणुथः	शृणुथ
उ० पु०	शृणोमि	शृण्वः शृणुवः,	शृण्मः, शृणुमः

लोट्

प्र० पु०	शृणोतु	शृणुताम्	शृण्वन्तु
म० पु०	शृणु	शृणुतम्	शृणुत
उ० पु०	शृणवानि	शृणवाव	शृणवाम

लङ्

प्र० पु०	अशृणोत्	अशृणुताम्	अशृण्वम्
म० पु०	अशृणोः	अशृणुतम्	अशृणुत
उ० पु०	अशृणवम्	अशृण्व, अशृणुव	अशृण्म, अशृणुम

विधिलिङ्

प्र० पु०	शृणुयात्	शृणुयाताम्	शृणुयुः
म० पु०	शृणुयाः	शृणुयातम्	शृणुयात
उ० पु०	शृणुयाम्	शृणुयाव	शृणुयाम

लृट्

प्र० पु०	श्रोष्यति	श्रोष्यतः	श्रोष्यन्ति
म० पु०	श्रोष्यसि	श्रोष्यथः	श्रोष्यथ
उ० पु०	श्रोष्यामि	श्रोष्यावः	श्रोष्यामः

आ+श्रु, प्रति+श्रु—प्रतिज्ञायाम् । सम्+श्रु—अकर्मकात् आत्मनेपदम्; संश्रृणुते; "हितान्न यः संश्रृणुते स किंप्रभुः ।"

शक् (शक्लृ) सामर्थ्ये—सकना

(अकर्मक; 'तुमुन्'-अन्त क्रिया पद के साथ प्रायशः प्रयुक्त होता है—"न च शक्नोम्यवस्थातुम् ।" सकर्मक धातु के योग से सकर्मक होता है—"इदं वक्तुं शक्यते" । "शक्योऽस्य मन्युर्भवता विनेतुम् ।")

लट्

	एकवचन	द्विवचन	बहुवचन
प्र० पु०	शक्नोति	शक्नुतः	शक्नुवन्ति
म० पु०	शक्नोषि	शक्नुथः	शक्नुथ
उ० पु०	शक्नोमि	शक्नुवः	शक्नुमः

लोट्

प्र० पु०	शक्नोतु	शक्नुताम्	शक्नुवन्तु
म० पु०	शक्नुहि	शक्नुतम्	शक्नुत
उ० पु०	शक्नवानि	शक्नवाव	शक्नवाम

लङ्

प्र० पु०	अशक्नोत्	अशक्नुताम्	अशक्नुवन्
म० पु०	अशक्नोः	अशक्नुतम्	अशक्नुत
उ० पु०	अशक्नवम्	अशक्नुव	अशक्नुम

अभ्यास

संस्कृत में अनुवाद करो :—सब लोग मीठी बात नहीं बोल सकते । हर समय गुरुजनों का वाक्य सुनना चाहिए । कभी अश्लील वाक्य सुनना नहीं चाहिए । मैंने प्रातःकाल में मेघ का गर्जन सुना था । तू कोकिल की मधुर ध्वनि नहीं सुनता है क्या ? राम-श्याम दोनों भाई गाना सुन रहे हैं । मैं बंगला भाषा पढ़ सकता हूँ । जो दूसरे के बुरे बर्ताव से असन्तुष्ट होता है वह स्वयं अपना शत्रु है (आत्मैव रिपुरात्मनः) ।

भ्वादि सकर्मक परस्मैपदी धातु

आप् (आप्लृ) प्राप्तौ—पाना—आप्नोति; आप्स्यति। "ज्ञानात् कैवल्यमाप्नोति।" "पात्रत्वाद् धनमाप्नोति।"

अव+आप्—प्राप्तौ, लाभे—"धार्मिकः सुखमवाप्नोति।" प्र+आप–प्राप्तौ; उपगमने च—"जटायुः प्राप रावणम्।"

सम्+प्र+आप्—सम्प्राप्तौ। वि+आप—व्याप्तौ। सम्+आप्–समाप्तौ। सम्+आप्+णिच्—समापने, समाप्तिकरणे, समापयति।

क्षि हिंसायाम् (नाशे) नष्ट करना–क्षिणोति; क्षेष्यति। "न तद् यशः शस्त्रभृतां क्षिणोति।"

कर्मकर्तरि—क्षीयते (क्षीण होना); "प्रतिक्षणमयं कायः क्षीयमाणो न लक्ष्यते।" "प्रत्यासन्नविपत्तिमूढमनसां प्रायो मतिः क्षीयते।" "क्षीयन्ते चास्य कर्माणि तस्मिन् दृष्टे परावरे।"

दु (टुदु) उपतापने (पीडने)—दुःखाना, सताना—दुनोति; दोष्यति। "वर्णप्रकर्षे सति कर्णिकारं दुनोति निर्गन्धतया स्म चेतः।"

धिन्व् (धिवि) प्रीणने—सन्तुष्ट करना—धिनोति; धिन्विष्यति। "धिनोति हव्येन हिरण्यरेतसम्।"

पृ—प्रीणने—पृणोति; परिष्यति। "अतिथीन् पृणोति गृहस्थः।"

हि प्रेरणे—प्रेरणा करना; निक्षेप करना–हिनोति; हेष्यति। "गदा शक्रजिता जिह्ये।" "हिनोति अस्त्रं नाशाय।"

प्र+हि–प्रेरणे (भेजना); निक्षेपे च। "न हि प्रहिणोमि वाक्शल्यं कदाचित्।"

भ्वादि सकर्मक आत्मनेपदी धातु

अश् (अशू) व्याप्तौ (पूरणे, आच्छादने, प्राप्तौ)—(१) व्याप्त करना; (२) प्राप्त होना।

(१) "क्षमातलं बलजलराशिरानशे।" (२) "अत्युत्कटैः पुण्यपापैरिहैव फलमश्नुते।"

लट्

	एकवचन	द्विवचन	बहुवचन
प्र० पु०	अश्नुते	अश्नुवाते	अश्नुवते
म० पु०	अश्नुषे	अश्नुवाथे	अश्नुध्वे
उ० पु०	अश्नुवे	अश्नुवहे	अश्नुमहे

लोट्

प्र० पु०	अश्नुताम्	अश्नुवाताम्	अश्नुवताम्
म० पु०	अश्नुष्व	अश्नुवाथाम्	अश्नुध्वम्
उ० पु०	अश्नवै	अश्नवावहै	अश्नवामहै

लङ्

प्र० पु०	आश्नुत	आश्नुवाताम्	आश्नुवत
म० पु०	आश्नुथाः	आश्नुवाथाम्	आश्नुध्वम्
उ० पु०	आश्नुवि	आनुवहि	आश्नुमहि

विधिलिङ्

प्र० पु०	अश्नुवीत	अश्नुवीयाताम्	अश्नुवीरन्
म० पु०	अश्नुवीथाः	अश्नुवीयाथाम्	अश्नुवीध्वम्
उ० पु०	अश्नुवीय	अश्नुवीवहि	अश्नुवीमहि

लृट्

प्र० पु०	{ अशिष्यते अक्ष्यते	अशिष्येते अक्ष्येते	अशिष्यन्ते अक्ष्यन्ते
म० पु०	{ अशिष्यसे अक्ष्यसे	अशिष्येथे अक्ष्येथे	अशिष्यध्वे अक्ष्यध्वे
उ० पु०	{ अशिष्ये अक्ष्ये	अशिष्यावहे अक्ष्यावहे	अशिष्यामहे अक्ष्यामहे

स्वादि सकर्मक उभयपदी धातु

वृ (वृञ्) वरणे (प्रार्थनायाम्)—मनोनीत करना, पसन्द करना, चाहना। "हिताय विद्वान् वृणुते हि सद्गुणम्।"

परस्मैपद

लट्

प्र० पु०	वृणोति	वृणुतः	वृण्वन्ति
म० पु०	वृणोषि	वृणुथः	वृणुथ
ऊ० पु०	वृणोमि	वृण्वः, वृणुवः	वृण्मः, वृणुमः

लोट्

प्र० पु०	वृणोतु	वृणुताम्	वृण्वन्तु
म० पु०	वृणु	वृणुतम्	वृणुत
उ० पु०	वृणवानि	वृणवाव	वृणवाम

लङ्

प्र० पु०	अवृणोत्	अवृणुताम्	अवृण्वन्
म० पु०	अवृणोः	अवृणुतम्	अवृण्वत
उ० पु०	अवृणवम्	अवृण्व, अवृणुव	अवृण्म, अवृणुम

विधिलिङ्

प्र० पु०	वृणुयात्	वृणुयाताम्	वृणुयुः
म० पु०	वृणुयाः	वृणुयातम्	वृणुयात
उ० पु०	वृणुयाम्	वृणुयाव	वृणुयाम

लृट्—वरिष्यति

आत्मनेपद

लट्

प्र० पु०	वृणुते	वृण्वाते	वृण्वते
म० पु०	वृणुषे	वृण्वाथे	वृणुध्वे
उ० पु०	वृण्वे	वृण्वहे-वृणवहे	वृण्महे-वृणमहे

लोट्

	एकवचन	द्विवचन	बहुवचन
प्र० पु०	वृणुताम्	वृण्वाताम्	वृण्वन्ताम्
म० पु०	वृणुष्व	वृण्वाथाम्	वृणुध्वम्
उ० पु०	वृणवै	वृणवावहै	वृणवामहै

लङ्

प्र० पु०	अवृणुत	अवृण्वाताम्	अवृण्वत
म० पु०	अवृणुथाः	अवृण्वाथाम्	अवृणुध्वम्
उ० पु०	अवृण्वि	अवृण्वहि, अवृणुवहि	अवृण्महि, अवृणुमहि

विधिलिङ्

प्र० पु०	वृण्वीत	वृण्वीयाताम्	वृण्वीरन्
म० पु०	वृण्वीथाः	वृण्वीयाथाम्	वृण्वीध्वम्
उ० पु०	वृण्वीय	वृण्वीवहि	वृण्वीमहि

लृट्

वरिष्यते, वरीष्यते ।

अप + वृ, अप + आ + वृ—उन्मोचने, प्रकाशने । आ + वृ—गोपने; आच्छादने; रोधे च । प्र + आ + वृ—परिधाने । नि + वृ + णिच्—निवारणे; निवारयति । निर् + वृ—निवृत्तौ, सुखे; स्वस्थतायाम् । वि + वृ व्याख्याने; प्रकाशने च । परि + वृ—वेष्टने । सम् + वृ—गोपने; निरोधे च ।

स्वादि सकर्मक उभयपदी धातु

चि (चिञ्) चयने (राशीकरणे, संग्रहणे)—चुनना, बटोरना, इकट्ठा करना—चिनोति, चिनुते; चेष्यति चेष्यते । द्विकर्मक—वृक्षं पुष्पं चिनोति ।

कर्मकर्त्तरि—वृद्धौ (बढ़ना); चीयते; "राजहंस ! तव सैव शुभ्रता चीयते न च न चापचीयते ।" "चीयते बालिशस्यापि सत्क्षेत्रपतिता कृषिः" अप् + चि–कर्मकर्त्तरि—हानौ, क्षये;—अपचीयते । अव + चि–

चयने। आ + चि—सञ्चये, संग्रहे; व्याप्तौ, आच्छादने च। उत् + चि—संग्रहे। उप + चि—वर्द्धने (बढ़ाना); "यशस्तमामुच्चैरुपचिनु।" कर्म-कर्त्तरि—वृद्धौ; उपचीयते; "बलनैव सहोपचीयते मदः।" नि + चि—व्याप्तौ; प्रधानतः–'क्त'प्रत्ययान्त ही व्यवहृत होता है; "शकुन्तनीड-निचितं बिभ्रज्जटामण्डलम्।" निर् + चि—निश्चये। परि + चि–ज्ञाने; अभ्यासे च। प्र + चि–कर्मकर्त्तरि–वृद्धौ; प्रचीयते। वि + चि—सञ्चये; ध्याने, अन्वेषणे च—"विष्णुं विचिन्वन्ति योगिनो विमुक्तये।" "काचं विचिन्वन्नपि दिव्यरत्नम्।" सम् + चि—सञ्चये।

धु (धुञ्), धू (धूञ्) कम्पने—हिलाना—धुनोति, धुनुते; धूनोति, धूनुते; धु—अनिट्; धू वेट्; धोष्यति, धोष्यते; धविष्यति, धविष्यते। "धूनोति चम्पकवनानि धुनोत्यशोकम् (वायुः)।" (२) अपनोदने; "स्रजमपि शिरस्यन्धः क्षिप्तो धुनोत्यहिशङ्कया।"

अव + धू—निरासे। आ + धू—ईषत्कम्पे। उत् + धू—उत्क्षेपे। निर्+धू, वि + धू—निरासे, नाशे।

सु (षुञ्) सुरासन्धाने; सोमादेः पीडने; मन्थने; स्नाने च—(१) मद्य चुआना; (२) सोमलतादि को निचोड़ना; (३) मथना; (४) नहाना (अकर्मक)—सुनोति, सुनुते; सोष्यति, सोष्यते।

अभि + सु—स्नाने; अभिषुणाति; "वारांस्त्रीनभिषुण्वते।"

स्तृ (स्तृञ्) आच्छादने—ढाँपना, बिछाना—स्तृणोति, स्तृणुते; स्तरिष्यति, स्तरिष्यते। "शिरोभिर्महीं तस्तार।"

आ + स्तृ—विस्तारे (बिछाना)। परि + स्तृ—विस्तारे; आवरणे च। वि + स्तृ—विस्तारे।

अनुवाद

स महदयशः प्राप्नोति नरकं च गच्छति—यह बहुत ही अकीर्ति प्राप्त करता है और नरक में जाता है। अहं हट्टे बहूनि फलानि प्राप्नुवम्—मैंने बाजार में बहुत फल पाये। देवस्त्वां सविता धिनोतु—सूर्य भगवान् तुम्हें प्रसन्न रखें।

वह पेड़ों से फल इकट्ठा करता है—वृक्षात् फलानि चिनोति स। राजा को विद्वानों में से मन्त्री चुनना चाहिये—राजा विद्वद्भ्यः सचिवान् वृणुयात्। मैंने रास्ते में भारी हल्ला-गुल्ला सुना—पथि महान्तं कोलाहलमशृणवमहम्। आलसियों को दुःख होता है—अलसी दुःखं प्राप्नुवन्ति।

अभ्यास

हिन्दी में अनुवाद करो—स तस्य पितुर्वचनं न शृणोति। साधवः सदैव सुखमाप्नुवन्ति। बालकाः पुष्पाणि चिन्वन्ति। सदैव गुरोर्वाक्यं शृणुयाः। न तद् यशः शस्त्रभृतां क्षिणोति। धुनोत्यशोकं वृक्षं वायुः। धुनोति शमलं कृष्णः सलिलस्य यथा शरत्। अश्नुते च परं तपः। वाराणसीं प्रति चरान् प्राहिणोत्। मुखं तव दुनोति माम्। यो यथा बीजं वपति स तथैव फलमाप्नोति।

संस्कृत में अनुवाद करो—जो आत्मा को जानने के लिए वरण करता है उसके सामने आत्मा अपना स्वरूप प्रकट कर देती है। जो सर्वान्तःकरण से प्रयत्न करता है वह उपयुक्त फल पाता है। इस वर्ष वणिकों ने वाणिज्य से तीन लाख रुपये प्राप्त किये हैं। परिश्रम का फल तुमने पाया, परन्तु उसने क्यों नहीं पाया? मनुष्य पूर्ण अध्यवसाय से क्या नहीं पा सकता? मेघ चारों दिशाएँ व्याप्त करता है। प्रबल झञ्झावात से वृक्ष-समूह कम्पित होते हैं। भक्तगण प्रातःकाल उठकर (उत्थाय) पुष्प-चयन करते हैं। परिमित और नियमित भोजन से शरीर का स्वास्थ्य और बल बढ़ता है। बाल्यकाल से ही प्रतिदिन थोड़ी-थोड़ी विद्या का संचय करना और उसके लिए (तदर्थं) सद्गुरु का (द्वितीय) वरण करना चाहिये। शङ्का मत करो। मेरे साथ रामचन्द्र को प्रेषण करो। राक्षस हमें अत्यन्त सताते हैं। रामचन्द्र अवश्य राक्षसों का (द्वितीया) संहार करने में (संहर्त्तुम्) समर्थ होगा। बाल्यकाल से ही अच्छी आदतें डालनी चाहिये। प्रत्येक कार्य परिश्रम से करना चाहिये। नौकर को मिठाई लाने के लिए भेजो। राजा ब्राह्मण का आदर करता है। वाल्मीकि मुनि ने रामायण-रचना कर हमलोगों का बड़ा उपकार किया। गीता में कृष्ण ने अनेक उपदेश दिये।

शुद्ध करो—छात्र शिक्षकस्य वचनं शृणुयात्। जलमुचः नभः आश्नुवन्त। सुहृदः हितं वचं शृणुहि। दृष्टाः बालकः चरमे वयसि दुःखमाप्नुते।

तनादि

क्रियाघटन-सूत्र

चतुर्लकार परे रहने से, कर्तृवाच्य में तनादिगणीय धातु के उत्तर उ आगम होता है; यथा—तन्+ति=तन्+उ+ति=तनोति।

सगुण विभक्ति परे रहने से, कृ—कर्, अन्यत्र कुर् होता है।

व, म और य परे रहने से, कृ धातु के उत्तर विहित उ आगम का लोप होता है

तनादि सकर्मक उभयपदी धातु

कृ (डुकृञ्) करणे

"ऋणं कुर्वन्ति पापिनः।" "तात! किं करवाण्यहम्?"; "सत्सङ्गतिः कथय किं न करोति पुंसाम्।" "कुरुते गंगा सागर-गमनम्।" "तत्कुरुष्व मदर्पणम्।"

परस्मैपद

लट्

	एकवचन	द्विवचन	बहुवचन
प्र० पु०	करोति	कुरुतः	कुर्वन्ति
म० पु०	करोषि	कुरुथः	कुरुथ
उ० पु०	करोमि	कुर्वः	कुर्मः

लोट्

प्र० पु०	करोतु	कुरुताम्	कुर्वन्तु
म० पु०	कुरु	कुरुतम्	कुरुत
उ० पु०	करवाणि	करवाव	करवाम

लङ्

	एकवचन	द्विवचन	बहुवचन
प्र० पु०	अकरोत्	अकुरुताम्	अकुर्वन्
म० पु०	अकरोः	अकुरुतम्	अकुरुत
उ० पु०	अकरवम्	अकुर्व	अकुर्म

विधिलिङ्

प्र० पु०	कुर्यात्	कुर्याताम्	कुर्युः
म० पु०	कुर्याः	कुर्यातम्	कुर्यात
उ० पु०	कुर्याम्	कुर्याव	कुर्याम

लृट्

प्र० पु०	करिष्यति	करिष्यतः	करिष्यन्ति
म० पु०	करिष्यसि	करिष्यथः	करिष्यथ
उ० पु०	करिष्यामि	करिष्यावः	करिष्यामः

(आत्मनेपद)

लट्

प्र० पु०	कुरुते	कुर्वाते	कुर्वते
म० पु०	कुरुषे	कुर्वाथे	कुरुध्वे
उ० पु०	कुर्वे	कुर्वहे	कुर्महे

लोट्

प्र० पु०	कुरुताम्	कुर्वाताम्	कुर्वताम्
म० पु०	कुरुष्व	कुर्वाथाम्	कुरुध्वम्
उ० पु०	करवै	करवावहै	करवामहै

लङ्

प्र० पु०	अकुरुत	अकुर्वाताम्	अकुर्वत
म० पु०	अकुरुथाः	अकुर्वाथाम्	अकुरुध्वम्
उ० पु०	अकुर्वि	अकुर्वहि	अकुर्महि

विधिलिङ्

	एकवचन	द्विवचन	बहुवचन
प्र० पु०	कुर्वीत	कुर्वीयाताम्	कुर्वीरन्
म० पु०	कुर्वीथाः	कुर्वीयाथाम्	कुर्वीध्वम्
उ० पु०	कुर्वीय	कुर्वीवहि	कुर्वीमहि

लृट्

प्र० पु०	करिष्यते	करिष्येते	करिष्यन्ते
म० पु०	करिष्यसे	करिष्येथे	करिष्यध्वे
उ० पु०	करिष्ये	करिष्यावहे	करिष्यामहे

अलम्+कृ—भूषणे (सजाना); अलङ्करोति। अलङ्करोम्यधुना नबवधूं पुष्पहारेण, उरी, ऊरी+कृ—स्वीकारे। पुरस्+कृ—पूजायाम्; अग्रतःकरणे च। तिरस्+कृ—भर्त्सने; आच्छादने च। बहिस्+कृ—दूरीकरणे; बहिष्करोति। सत्+कृ—आदरे। नमस्+कृ—नमस्कारे। सजू+कृ—सहायीकरणे। अधि+कृ—स्वामित्वे; नियोगे; विषयीकरणे च। अनु+कृ—अनुकरणे। अप+कृ—अपकारे; जिसका अपकार किया जाय; उसमें प्रायशः षष्ठी होती है; "किं तस्या मयाऽपकृतम्'; कही द्वितीया और सप्तमी भी होता है; "सैनिकाः केचिदपकुर्युर्युधिष्ठिरम्।" "न परेषु महौजसश्छलादपकुर्वन्ति मलिम्लुचा इव।" आ+कृ+णिच्—आह्वाने; आकारयति। अप+आ+कृ—अपसारणे। "ऋणानि त्रीन्नपाकृत्य मनो मोक्षे निवेशयेत्।" उप+आ+कृ—संस्कारपूर्वकवेदग्रहणे; संस्कारपूर्वकपशुहनने च; "सौमित्रे। गोसहस्रमुपाकुरु।" निर्+आ+कृ—निराकरणे, निरासे; "सांख्यमतं निराकरोमि।" वि+आ+कृ–व्याख्यायाम्। उप+कृ–उपकारे; प्रायशः षष्ठी के साथ; "न हि दीपौ परस्परस्योपकुरुतः।" (२) करणे च; "किं ते भूयः प्रियमुपकरोमि ?"

परा+कृ-परिग्रहणे। परि+कृ-भूषणे; शोधने, निर्मलीकरणे च; परिष्करोति, पर्य्यस्करोत्। वि+प्र+कृ—पीडने; "किं सत्त्वानि

विप्रकरोषि ?"; (२) विकारप्रापणे च; "कमपरमवशं न विप्रकुर्य्युर्विभुमपि तं यदमी स्पृशन्ति भावाः ?" प्रति+कृ—प्रतिकारे। वि+कृ—विकारे; "उपयन्नपयन् धर्मो विकरोति हि धर्मिणम्।" "चित्तं विकरोति कामः।" अकर्मक होने से आत्मनेपदी होता है; "हीनान्यनुपकर्त्तृणि प्रवृद्धानि विकुर्वते (मित्राणि)।" विरुद्धं चेष्टन्ते, अपकुर्वते इत्यर्थः। सम+कृ—अलङ्करणे; शोधने च—संस्करोति।

तन् (तनु) विस्तारे (प्रसारणे)—तानना, पसारना, फैलाना—तनोति, तनुते, तनिष्यते, तनिष्यते। "तनोति रविरातपम्।"—(२) करणे, उत्पादने; "त्वयि विमुखे मयि सपदि सुधानिधिरपि तनुते तनुदाहम्।" "पितुर्मुदं तेन ततान सोऽर्भकः।" अनुष्ठाने, निष्पादने; "नवतिं नवाधिकां महाक्रतूनां ततान।" (४) रचने च; "तनुते टीकाम्।"

अव+तन्—व्याप्तौ। आ + तन्—व्याप्तौ;। "आतनोति गृहं धूम्रजालः।" "आतेने वनगहनानि वाहिनी स।" (२) उत्पादने; "जडतामातनोति।" (३) करणे "सपर्यामाततान।" प्र+तन्–विस्तारे। वि+तन्—विस्तारे; व्याप्तौ; करणे; उत्पादने; रचने च। वि+तन्+णिच्–दीर्घीकरणे, विस्तारे; वितानयति। सम्+तन्–विस्तारे।

तनादि सकर्मक आत्मनेपदी धातु

मन् (मनु) बोधे—जानना, समझना—मनुते; मंस्यते। "मनुते मनुतुल्योऽसौ प्रजामात्मजवत् प्रभुः।" "समाभूता दृष्टिस्त्रिभुवनमपि ब्रह्म मनुते।"

अनुवाद

मलिनमपि हिमांशोर्लक्ष्म लक्ष्मीं तनोति—वह दाग काला होने पर भी चन्द्रमा के सौन्दर्य को बढ़ाता है। कुर्य्याः अध्ययने यत्नम्–अपनी पढाई में ध्यान देना चाहिये। भृत्यः कटमकरोत्—नौकर ने चटाई बनायी। संस्पर्शः पुनरपि तनोति मोहम्—वही स्पर्श फिर मोह लाता है।

अभ्यास

हिन्दी में अनुवाद करो—न स स्वं कुरुते कर्म। भृत्यानां नित्यमज्ञानं क्षिणुते यः सदुक्तिभिः। कुम्भकारः दण्डेन घटं करोति। अध्ययने यत्नं कुरु। सदा सुहृदः प्रियं कुर्य्याः। महात्मनां यशांसि दिक्षु प्रतन्वन्ति कवयः। सत्कार्यं नरस्य कीर्तिं सर्वत्र तनोति। श्वः कार्यमद्य कुर्वीत। तनोति रविरातपम्। इमे तडागं जलैः परिपूर्णं कुरु। नहि कार्यार्थिनः नरा अकाले अभिव्यक्तिं कुर्व्वन्ति। विद्या कीर्तिं च दिक्षु वितनोति। कदापि यूयं परस्परं मा विरोधं कुरुत।

संस्कृत में अनुवाद करो—मैंने इसे नहीं किया। तुमने भूल की। वह अपना काम बड़ी सावधानी से करता है। अपना कर्त्तव्य करो। युधिष्ठिर ने अश्वमेध यज्ञ किया। सभी अपना अपना काम करो। भोजन के पश्चात् और रात्रि में स्नान नहीं करना चाहिये। जो लोग असत् कार्य्य करते हैं, वे अवश्य दुःख पाते हैं। वह करे तो करे, मैं नहीं करूँगा। राम की माता ने मनोयोग से गृह-संस्कार किया। प्राणपण से दूसरे का उपकार करना उचित है।

क्र्यादि

क्रियाघटन-सूत्र

चतुर्लकार परे रहने सु, कर्तृवाच्य में क्र्यादिगणीय धातु के उत्तर 'ना' आगम होता है;—यथा—अश् + ति—अश्नाति।

'अस्'-भिन्न विभक्ति का स्वर वर्ण परे, 'ना'-'न्' होता है; यथा—अश् + अन्ति = अश् + ना + अन्ति = अश् + न् + अन्ति = अश्नन्ति। "अश्नन्ति दिव्यान् दिवि देवभोगान्।"

'ना' परे रहने से, धातु के उपधा नकार का लोप होता है; यथा—मन्थ् + ति = मन्थ् + ना + ति = मथ्नाति।

अगुण व्यञ्जन वर्ण परे रहने से, 'ना' का 'नी' होता है; यथा—अश् + नातः = अश्नीतः।

'ना' परे रहने से पू, लू, धू, गॄ, दॄ, वॄ और शॄ धातु का अन्त्य स्वर ह्रस्व होता है। यथा—पू + ना + नि = पुनाति। "सत्पुत्रः पुनाति कुलम्।"

व्यञ्जन वर्ण के परस्थित 'ना'—'हि' के साथ मिलकर 'आन' होता है; यथा—अश् + हि = अश् + ना + हि = अश + आन = अशान।

'ना' परे रहने से, ग्रह् का गृह् और ज्ञा का जा होता है; यथा—ग्रह् + ति = गृह्णाति; ज्ञा + ति = जानाति।

क्र्यादि सकर्मक उभयपदी धातु

क्री (डुक्रीञ्) क्रये (मूल्यदानेन द्रव्यग्रहणे)

("क्रीणाम्यहं शलाकामेकं वैद्युतम्।" "क्रीणाति क्रीणीते धान्यं धनेन लोकः।")

परस्मैपद

लट्

	एकवचन	द्विवचन	बहुवचन
प्र० पु०	क्रीणाति	क्रीणीतः	क्रीणन्ति
म० पु०	क्रीणासि	क्रीणीथः	क्रीणीथ
उ० पु०	क्रीणामि	क्रीणीवः	क्रीणीमः

लोट्

प्र० पु०	क्रीणातु	क्रीणीताम्	क्रीणन्तु
म० पु०	क्रीणीहि	क्रीणीतम्	क्रीणीत
उ० पु०	क्रीणानि	क्रीणाव	क्रीणाम

लङ्

प्र० पु०	अक्रीणात्	अक्रीणीताम्	अक्रीणन्
म० पु०	अक्रीणाः	अक्रीणीतम्	अक्रीणीत
उ० पु०	अक्रीणाम्	अक्रीणीव	अक्रीणीम

विधिलिङ्

प्र० पु०	क्रीणीयात्	क्रीणीयाताम्	क्रीणीयुः
म० पु०	क्रीणीयाः	क्रीणीयातम्	क्रीणीयात
उ० पु०	क्रीणीयाम्	क्रीणीयाव	क्रीणीयाम

लृट्—क्रेष्यति

आत्मनेपद

लट्

प्र० पु०	क्रीणीते	क्रीणाते	क्रीणते
म० पु०	क्रीणीषे	क्रीणाथे	क्रीणीध्वे
उ० पु०	क्रीणे	क्रीणीवहे	क्रीणीमहे

लोट्

	एकवचन	द्विवचन	बहुवचन
प्र० पु०	क्रीणीताम्	क्रीणाताम्	क्रीणताम्
म० पु०	क्रीणीष्व	क्रीणाथाम्	क्रीणाध्वम्
उ० पु०	क्रीणै	क्रीणावहै	क्रीणामहै

लङ्

प्र० पु०	अक्रीणीत	अक्रीणाताम्	अक्रीणत
म० पु०	अक्रीणीथः	अक्रीणाथाम्	अक्रीणीध्वम्
उ० पु०	अक्रीणि	अक्रीणीवहि	अक्रीणीमहि

विधिलिङ्

प्र० पु०	क्रीणीत	क्रीणीयाताम्	क्रीणीरन्
म० पु०	क्रीणीथाः	क्रीणीयाथाम्	क्रीणीध्वम्
उ० पु०	क्रीणीय	क्रीणीवहि	क्रीणीमहि

लृट्

प्र० पु०	क्रेष्यते	क्रेष्येते	क्रेष्यन्ते
म० पु०	क्रेष्यसे	क्रेष्येथे	क्रेष्यध्वे
उ० पु०	क्रेष्ये	क्रेष्यावहे	क्रेष्यामहे

परि+क्री—क्रयविशेषे (किराये पर लेना)। वि+क्री—विक्रये; विक्रीणीते। विनिमय (अदला-बदली करना) अर्थ में परस्मैपदी होता है; "विक्रीणाति तिलैस्तिलान्" ।

ज्ञा बोधे (ज्ञाने)

("जानामि धर्मं न च मे प्रवृत्तिः ।" "आपत्सु मित्रं जानीयात् ।" उपसर्गविहीन उभयपदी; "जाने तपसो वीर्य्यम् ।")

परस्मैपद

लट्

	एकवचन	द्विवचन	बहुवचन
प्र० पु०	जानाति	जानीतः	जानन्ति
म० पु०	जानासि	जानीथः	जामीथ
उ० पु०	जानामि	जानीवः	जानीमः

लोट्

प्र० पु०	जानातु	जानीताम्	जानन्तु
म० पु०	जानीहि	जानीतम्	जानीत
उ० पु०	जानानि	जानाव	जानाम

लङ्

प्र० पु०	आजानात्	अजानीताम्	अजानन्
म० पु०	आजानाः	आजानीतम्	अजानीत
उ० पु०	आजानाम्	अजानीव	अजानीम

विधिलिङ्

प्र० पु०	जानीयात्	जानीयाताम्	जानीयुः
म० पु०	जानीयाः	जानीयातम्	जानीयात
उ० पु०	जानीयाम	जानीयाव	जानीयाम

लृट्

प्र० पु०	ज्ञास्यति	ज्ञास्यतः	ज्ञास्यन्ति
म० पु०	ज्ञास्यसि	ज्ञास्यथः	ज्ञास्यथ
उ० पु०	ज्ञास्यामि	ज्ञास्यावः	ज्ञास्यामः

आत्मनेपद

लट्

	एकवचन	द्विवचन	बहुवचन
प्र० पु०	जानीते	जानाते	जानते
म० पु०	जानीषे	जानाथे	जानीध्वे
उ० पु०	जाने	जानीवहे	जानीमहे

लोट्

प्र० पु०	जानीताम्	जानाताम्	जानताम्
म० पु०	जानीष्व	जानाथाम्	जानीध्वम्
उ० पु०	जानै	जानावहै	जानामहै

लङ्

प्र० पु०	अजानीत	अजानाताम्	अजानत
म० पु०	अजानीथाः	अजानाथाम्	अजानीध्वम्
उ० पु०	अजानि	अजानीवहि	अजानीमहि

विधिलिङ्

प्र० पु०	जानीत	जानीयाताम्	जानीरन्
म० पु०	जानीथाः	जानीयाथाम्	जानीध्वम्
उ० पु०	जानीय	जानीवहि	जानीमहि

लृट्

प्र० पु०	ज्ञास्यते	ज्ञास्येते	ज्ञास्यन्ते
म० पु०	ज्ञास्यसे	ज्ञास्येथे	ज्ञास्यध्वे
उ० पु०	ज्ञास्ये	ज्ञास्यावहे	ज्ञास्यामहे

अनु + ज्ञा—अनुमतौ; "तदनुजानीहि मां गमनाय ।" अनु + ज्ञा + णिच्—गमनाय आदेशग्रहणे, आमन्त्रणे, आप्रच्छने, अनुज्ञापयति; "स मातरमनुज्ञाप्य तपस्येव मनो दधे ।" अभि + ज्ञा—अनुस्मृतौ; ज्ञाने च । प्रति + अभि + ज्ञा—अनुस्मरणे । अव + ज्ञा—अनादरे, अवमाननायाम् । आ + ज्ञा—ज्ञाने । आ + ज्ञा + णिच्—आदेशे; शासने; विज्ञापने च । उप + ज्ञा–आद्यज्ञाने; "पाणिनिना उपज्ञातं व्याकरणम्" (विनोपदेशेन ज्ञातम्) । परि + ज्ञा—परिज्ञाते, निश्चये । प्र + ज्ञा—सम्यग्बोधे, परिज्ञाने । प्रति + ज्ञा—प्रतिज्ञायाम्; आत्मनेपदी, "प्रतिजाने प्रियाऽसि मे ।" "कौन्तेय ! प्रतिजानीहि न मे भक्तः प्रणश्यति ।" "हरचापारोपणेन कन्या दानं प्रतिजानीते ।" वि + ज्ञा—विशिष्टज्ञाने । वि + ज्ञा + णिच्—विज्ञापने; विज्ञापयति ।

ग्रह उपादाने (ग्रहणे, स्वीकारे)—लेना ("प्रजानामेव भूत्यर्थं स ताभ्यो बलिमग्रहीत् ।")

परस्मैपद

लट्

	एकवचन	द्विवचन	बहुवचन
प्र० पु०	गृह्णाति	गृह्णीतः	गृह्णन्ति
म० पु०	गृह्णासि	गृह्णीथः	गृह्णीथ
उ० पु०	गृह्णामि	गृह्णीवः	गृह्णीमः

लोट्

	एकवचन	द्विवचन	बहुवचन
प्र० पु०	गृह्णातु	गृह्णीताम्	गृह्णन्तु
म० पु०	गृहाण	गृह्णीतम्	गृह्णीत
उ० पु०	गृह्णानि	गृह्णाव	गृह्णाम

लङ्

	एकवचन	द्विवचन	बहुवचन
प्र० पु०	अगृह्णात्	अगृह्णीताम्	अगृह्णन्
म० पु०	अगृह्णाः	अगृह्णीतम्	अगृह्णीत
उ० पु०	अगृह्णाम्	अगृह्णाव	अगृह्णाम

विधिलिङ्

	एकवचन	द्विवचन	बहुवचन
प्र० पु०	गृह्णीयात्	गृह्णीयाताम्	गृह्णीयुः
म० पु०	गृह्णीयाः	गृह्णीयातम्	गृह्णीयात
उ० पु०	गृह्णीयाम्	गृह्णीयाव	गृह्णीयाम

लृट—ग्रहीष्यति

आत्मनेपद

लट्

प्र० पु०	गृह्णीते	गृह्णाते	गृह्णते
म० पु०	गृह्णीषे	गृह्णाथे	गृह्णीध्वे
उ० पु०	गृह्णे	गृह्णीवहे	गृह्णीमहे

लोट्

प्र० पु०	गृह्णीताम्	गृह्णाताम्	गृह्णताम्
म० पु०	गृह्णीष्व	गृह्णाथाम्	गृह्णीध्वम्
उ० पु०	गृह्णै	गृह्णीवहै	गृह्णीमहै

लङ्

प्र० पु०	अगृह्णीत	अगृह्णाताम्	अगृह्णत
म० पु०	अगृह्णीथाः	अगृह्णाथाम्	अगृह्णीध्वम्
उ० पु०	अगृह्णि	अगृह्णीवहि	अगृह्णीमहि

विधिलिङ्

प्र० पु०	गृह्णीत	गृह्णीयाताम्	गृह्णीरन्
म० पु०	गृह्णीथाः	गृह्णीयाथाम्	गृह्णीध्वम्
उ० पु०	गृह्णीय	गृह्णीवहि	गृह्णीमहि

लृट्

	एकवचन	द्विवचन	बहुवचन
प्र० पु०	ग्रहीष्यते	ग्रहीष्येते	ग्रहीष्यन्ते
म० पु०	ग्रहीष्यसे	ग्रहीष्येथे	ग्रहीष्यध्वे
उ० पु०	ग्रहीष्ये	ग्रहीष्यावहे	ग्रहीष्यामहे

ग्रह + णिच्-शिक्षणे; ग्राहयति। अनु + ग्रह्-अनुग्रहे, "महात्मानऽनुगृह्णन्ति भजमानानरीनपि।" अव + ग्रह्—निग्रहे। उद् + ग्रह् + णिच्—उपन्यासे; उद्ग्राहयति। उप + ग्रह्-परिग्रहे; "अव्यवसायिन प्रमदेव वृद्धयति नेच्छत्युपग्रहीतुं लक्ष्मीः।" नि + ग्रह्-पीडने। परि + ग्रह—आदाने, स्वीकारे। प्र + ग्रह—प्रकर्षेण ग्रहणे। प्रति + ग्रह्—स्वीकारे; आक्रमणे च। वि + ग्रह्—युद्धे, कलहे; समस्तस्य पृथक्करणे च। सम् + ग्रह—संग्रहे।

क्र्यादि सकर्मक परस्मैपदी धातु

अश् भोजने—खाना-अश्नाति, अशिष्यति। "अश्नात्यन्नं बुभुक्षितः।"

उप + अश्—उपभोगे; प्राप्तौ च। प्र; सम + अश्—भोजने।

कुष् निष्कर्षे (निःसारणे बहिष्करणे)—खींच कर निकालना—कुष्णाति; कोषिष्यति। "शिवाः कुष्णन्ति मांसानि।"

निर् + कुष्—बहिर्निःसारणे; विदारणे; निष्कुष्णाति; निष्कोक्ष्यति, निष्कोषिष्यति।

क्लिश् (क्लिशू) बाधने (पीडने)—दुःख देना—क्लिश्नाति; क्लेशिष्यति, क्लेक्ष्यति। "स क्लिश्नाति भुवनत्रयम्।"

गॄ शब्दे (उक्तौ, उच्चारणे; स्तुतौ)—(१) कहना; (२) स्तव करना—गृणाति; गरिष्यति, गरीष्यति। (१) गृणाति वाक्यं लोकः; (२) "केचिद्भीताः प्राञ्जलयो गृणन्ति।"

ग्रन्थ् सन्दर्भे (ग्रन्थने; रचनायाम्)—(१) गूँथना, (२) बनाना—ग्रथ्नाति, ग्रन्थिष्यति।

(१) "ग्रथ्नाति मालां मालिकः।" "काचं मणिं काञ्चनमेकसूत्रे ग्रथ्नन्ति मूढाः।" (२) "ग्रथ्नामि काव्यशशिनं विततार्थरश्मिम्।"

उद्+ग्रन्थ्—बन्धने। सम्+ग्रन्थ्—रचनायाम्।

दॄ विदारणे—फाड़ना—दृणाति; दरिष्यति, दरीष्यति। "दृणाति च रिपून् रणे।"

वि+दॄ—विदारणे; "स्तनं विददार काकः।" पुष् पोषणे (भरणे;) वर्द्धने (१) पालना; (२) बढ़ाना—पुष्णाति; पोषिष्यति। (१) "तेनाद्य वत्समिव लोकममुं पुपाण।" (२) "पुपोष लावण्यमयान् विशेषान्।" (३) प्रकाशने, बोधने; "न हीश्वरा व्याहृतयः कदाचित् पुष्णन्ति लोके विपरीतमर्थम्।"

बन्ध बन्धने—(१) बाँधना बध्नाति; भन्त्स्यति। "प्रस्थानभिन्नां न बबन्ध नीवीम्।" (२) परिधाने; "नहि चूडामणिः पादे प्रभवामीति बध्यते।" (३) रचने; "श्लोक एष त्वया बद्ध।"

अनु+बन्ध्—सम्बन्धे अपरित्यागे, अनुवर्त्तने; "सत्योऽयं जनप्रवादो यद् विपत् विपद् सम्पत् सम्पदमनुबध्नाति।" आ+बन्ध्—बन्धने; करणे च—"आबद्धाञ्जलिः।" उत्+बन्ध्—गलरज्ज्वादिना उर्ध्वबन्धने। नि+बन्ध्—बन्धने; स्थिरीकरणे; रचनायाञ्च। निर्+बन्ध्—आग्रहे। प्र+बन्ध्—रचनायाम्। प्रति+बन्ध्—व्याघाते, निरोधे; "प्रतिबध्नाति हि श्रेयः पूज्यपूजाव्यतिक्रमः।"

सम्+बन्ध्—सम्बन्धे, संयोगे।

मन्थ विलोडने[1] (मन्थने; संक्षोभे; पीडने; विनाशे)—(१) मथना (२) हिलाना, विचलित करना, सताना (३) विनष्ट करना—मथ्नाति मन्थिष्यति। (१) मथ्नाति दधि बलवी; द्विकर्मक—"सुधां सागरं ममन्थुः।" (२) "मां मथ्नातीव मन्मथः।" "मन्मथो मां मथनन् निजनाम सान्वयं करोति।" (३) "मथ्नामि कौरवशतं समरे न कोपात्?"

१ मन्थ् (मथि)—धातु भ्वादि परस्मैपदी भी होता है; मन्थति। 'मथ' (मथे) धातु भी होता है भ्वादि परस्मैदी; मथति।

मुष् (मुष) स्तेये (चौर्ये; लुण्ठने; अपाकरणे)—(१) चोरी करना, (२) दूर करना—मुष्णाति; मोषिष्यति। (१) "मुषाण रत्नानि।" द्विकर्मक—"देवदत्तं शतं मुष्णाति।" (२) "दैवं प्रज्ञां मुष्णाति।" "विषयबाहुल्यं कालविप्रकर्षश्च नः स्मृतिं मुष्णाति।"

सम्+प्र+मुष्—सम्यक् रूप से चोरी करना, अनुभूतविषयासम्प्रमोषः स्मृतिः।

मृद् क्षोदे (मर्दने; चूर्णीकरणे; विनाशने)—(१) माँड़ना, मलना; चूर करना; (२) विनष्ट करना—मृद्नाति; मर्दिष्यति। (१) "मम च मुदितं क्षौमं बाल्ये त्वदङ्गविवर्त्तनैः।" "मृद्नाद्विषतां दर्पं यो भुजाभ्यां भुवः पतिः।" (२) "बलान्यमृद्नान्नलिनाभवक्त्रः।"

अभि, अव+मृद् निष्पेषणे, पीडने, दलने, उच्छेदे। उप+मृद्-हनने, विनाशने "उपमृद्नाति चित्तं चेद् ध्याताऽसौ ननु तत्त्ववित्।" वि+मृद्—घर्षणे। सम्+मृद्—पीडने, सौञ्चूर्णने।

शॄ हिंसने (हनने; छेदने)—हिंसा करना, मारना; टुकड़ा करना—शृणाति; शरिष्यति, शरीष्यति। "वनाश्रयाः कस्य मृगाः परिग्रहाः? शृणाति यस्तान् प्रसभेन तस्य ते।" "पशुमिव परशुः पर्वशस्त्वां शृणातु।"

स्तम्भ् (स्तन् भु) रोधने; जडीकरणे च—(१) रोकना; (२) निश्चल करना, अचेत करना—स्तभ्नाति, स्तभ्नोति (स्वादि); स्तम्भिष्यति। (१) "कण्ठः स्तम्भितबाष्पवत्तिकलुषः।" (२) "प्राणा दध्वंसिरे, गात्रं तस्तम्भे च प्रिये हते।"

अव+स्तम्भ—अवलम्बने; निरोधे च। उत्+स्तम्भ्—धारणे, आश्रये। उप+स्तम्भ्—आश्रये। वि+स्तम्भ्—प्रतिबन्धे निवारणे स्थापने; धारणे च। सम्+स्तम्भ् निरोधे; स्थिरीकरणे च।

क्र्यादि सकर्मक उभयपदी धातु

धू—(धूञ्) कम्पने—हिलना—धुनाति, धुनीते; धोष्यति धोष्यते, धविष्यति धविष्यते। "चूतं धुनाति वायुः।"

पू—(पूञ्) शोधने (पवित्रीकरणे)—शुद्ध करना, पवित्र करना—पुनाति, पुनीते; पविष्यति, पविष्यते। "जाह्नवी नः पुनातु।" "भागीरथि! पुनीहि माम्", "पुण्याश्रमदर्शनेन तावदात्मनं पुनीमहे।"

प्री (प्रीञ्) प्रीणने—प्रीत करना—प्रसन्न करना—प्रीणाति, प्रीणीते; प्रेष्यति, प्रेष्यते।

"प्रणाति यः सुचरितैः पितरं स पुत्रः।" "प्रभुः प्रीणातु विश्वभाक्।" "कच्चिन्मनस्ते प्रीणाति वनवासे ?" (अकर्मक प्रयोग)।

वृ (वृञ्) वरणे—प्रार्थना करना—वृणाति, वृणीते; वरिष्यति वरिष्यते, वरीष्यति वरीष्यते। "पुत्र! वरं वृणीष्व।"

लू (लुञ्) छेदने—काटना; लुनना—लुनाति, लुनीते; लविष्यति, लविष्यते। "लुनाति शस्यं कृषकः।" "शरासनज्यामलुनाद् बिडौजसः।" "लुनीहि नन्दनम्।"

स्तृ (स्तृञ्) आच्छादने—ढाँकना, बिछाना—स्तृणाति, स्तृणीते; स्तरिष्यते, स्तरीष्यते, स्तरीष्यति; स्तरीष्यते।

अनुवाद

बर्त्तन को अपने दोनों हाथों में लो—गृहाणैतत् भाण्डं हस्ताभ्याम्। वह मांस नहीं खाता—स मांसं नाश्नाति। हम लोग यह कल ही जानते थे—गतेऽहनि इदं वयमजानीम। लड़का एक कपड़ा खरीदता है—वस्त्रमेकं क्रीणाति बालकः। मैं लाल कपड़ा नहीं पहनूँगा—नाहं रक्तवस्त्रं परिधास्यामि।

